A.C. Joshi Library
P.U. Chandigarh

MSS No. 370 M Subject Religion

Name of MSS श्रीमद् भागवत ; भावार्थ दीपिका सहित

Author

Period Folios 127

Script Devnagri Source Prithipal Singh

Missing Folios

127

श्री· भा·टी· च· १

ॐस्वस्तिश्रीगणेशायनमः ॐअथैकत्रिंशताध्यायैर्विसर्गस्तत्रेर्यते विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वा
दिभिः कृतः तत्रतुप्रथमेध्यायेमनुकन्यान्वयाः पृथक् वर्ण्यन्तेयत्रयज्ञादिमूर्तिभिः प्रभवोहरेः मनु
कन्यान्वयंविस्तरेणवक्तुमाह मनोस्त्विति चकाराद्द्वौपुत्रौच १ तच्छब्दादन्यतोपिपुत्रलाभःसूचितः त
द्दर्शयितुमाह पुत्रिकाधर्ममाश्रित्येति अभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृतां अस्यांयोजायते

मैत्रेयउवाच मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रु
ताः १ आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः २ प्र
जापतिःसभगवान्रुचिस्तस्यामजीजनत् मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना ३ यस्तयोःपुरु
षःसाक्षाद्विष्णुर्यज्ञस्वरूपधृक् यास्त्रीसादक्षिणाभूतेरंशभूतानपायिनी ४

पुत्रःसमेपुत्रोभवेदिति भावाबंधेनकन्यादानंपुत्रिकाधर्मःसचाभ्रातृकायांकन्यायांपुत्रार्थिनएवप्रसिद्धः श्री
नतुसपुत्रस्यतथापिमनुःसपुत्रआसीत् तथापिपुत्रबाहुल्यकामःतथाकृतवानित्याहभ्रातृमतीमपीति टी
२ मिथुनंपुरुषंस्त्रियंचसमाधिनाईश्वराध्यानेन ३ भूतेर्लक्ष्म्याअंशभूताअतस्तयोर्विवाहोनविरुद्धइतिभा १

1A

पुत्र्याः आकूतेः प्रवर्त्तते ५ यजुषां यज्ञानां मंत्राणां वा पतिः विभुः ६ द्विषट् द्वादश ७ प्रसंगात्स्वायंभुवमन्वं
तरगतं षट्कमाह तुषित इति द्वाभ्यां मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ऋषयोंशावतारश्च हरेः षड्विधमु
च्यत इति तत्र स्वायंभुवो मनुः तुषिता देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञो हरेरवतारः स एव सुरगणेश्वरः

आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषं स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणां ५ तां कामयानां
भगवानुवाह यजुषांपतिः तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ६ तोषः प्रतोषः संतोषो भद्रः
शांतिरिडस्पतिः इध्मः कविः विभुः स्वह्नः सुदेवो रोचनो द्विषट् ७ तुषिता नाम ते देवा आसन्स्वायंभुवांत
रे मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ८ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ तत्पुत्रपौत्रन
प्तॄणामनुवृत्तं तदंतरं ९ देवहूतिमदात्तात कर्दमायात्मजां मनुः तत्संबंधि श्रुतप्रायं भवता गदतो
मम १० दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः प्रायच्छद्यत्कृतः सर्गः त्रिलोक्यां विततो महान् ११
याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे १२

हः ८ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तदेवं यज्ञस्य देहरूपेण षड्विधत्वं तयोः पुत्रपौत्रैर्नप्तॄणां वंशैरनु
वृत्तं व्याप्तं पालितं तन्मन्वंतरं ९ श्रुतप्रायं बाहुल्येन श्रुतं तत्कन्यावंशानामश्रुतत्वात्तद्ग्रहणं १०।११ प्रसूति

प्रसवंप्रोच्यमानंनिबोधमे १२

2

श्री·
भा·वं·
टी·
२

ययोर्वंशेनापूरितं १३ कश्यपस्यवंशोपष्टेवक्ष्यतिद्वितीयस्यवंशाभावात्पूर्णिमेति देवकुल्यांनामकन्यांच
हरेःपादक्षालननाज्जन्मांतरेयादिवःसरिद्गंगाभूतता १४ आत्मेशब्रह्मणांसंभवान् विष्णुरुद्रब्रह्मणांशैःसं

पत्नीमरीचेस्तुकलासुषुवेकर्दमात्मजा कश्यपंपूर्णिमाणंचययोरापूरितंजगत् १३ पूर्णिमासू
तविरजंविश्वगंचपरंतप देवकुल्यांहरेःपादशौचाद्याभूत्सरिदिवः १४ अत्रेःपत्न्यनसूयात्रीन्जज्ञे वा
सुयशसःसुतान् दत्तंदुर्वाससंसोममात्मेशब्रह्मसंभवान् १५ विदुरउ· अत्रेर्गृहेसुरश्रेष्ठाःस्थित्यु
त्पत्त्यंतहेतवः किंचिच्चिकीर्षवोजाताएतदाख्याहिमेगुरो मैत्रेयः ब्रह्मणाचोदितःसृष्टावत्रिर्ब्र
ह्मविदांवरः सहपत्न्यायया‌वृक्षंकुलाद्रिंतपसिस्थितः १७ तस्मिन्प्रसूनस्तबकपलाशाशोकका
नने वार्भिःस्रवद्भिरुद्घुष्टेनिर्विंध्यायाःसमंततः १८ प्राणायामेनसंयम्यमनोवर्षशतंमुनिः अति
ष्ठदेकपादेननिर्द्वंद्वोनिलभोजनः १९ शरणंतंप्रपद्येहंयएवजगदीश्वरः प्रजामात्मसमांमह्यंप्रयच्छ
वा त्वितिचिंतयन् २० तप्यमानंत्रिभुवनंप्राणायामैधसाग्निना निर्गतेनमुनेर्मूर्ध्नः समीक्ष्यप्रभवस्त्रयः २१

भूतान् १५ किंचित्किंस्वित् १६ ऋक्षंनामकुलाद्रिंतपसिस्थितःसन् १७ तस्मिन्कुलाद्रौप्रसूनानांस्तबकायेषुप·
लाशाशोकेषुतैर्युक्तेकानने निर्विंध्यानामनदीतस्याःस्रवद्भिर्वार्भिरुद्घुष्टेनादिते १८ १९ २० प्राणायाममयैधःसं

२ दीप्तकोपयस्तेनमुनेर्मूर्ध्नोनिर्गतेनाग्निनातप्यमानंसमी
क्ष्यतदाश्रमपदंययुरित्यन्वयः २१

३१

अप्सरःप्रमुखैर्वितायमानं विस्तार्यमाणं यशो येषां ते २१ तेषां प्रादुर्भावः प्राकट्यं तस्य संयोगः सन्निपितेन वि
द्योतितं मनो यस्य उत्कर्षेण तिष्ठन् २३ अर्हणं पुष्पादिकं मं जलं यस्य उपतस्थे एजुयामास हृषा यस्याः हृष्टान् स्वैः स्वै
श्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः २४ कृपया अवलोको यस्मिन् हसद्वदनेन तेन उपलंभिन् प्रसन्नत्वेपित्रा

अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः वितायमानयशसस्तदाश्रमपदं ययुः २२ तत्प्रादुर्भवसंयो
गविद्योतितमना मुनिः उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् २३ प्रणम्य दंडवद्भूमावुपतस्थेऽर्ह
णांजलिः वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्च चिह्नितान् कृपावलोकेन हसद्वदनेनोपलंभितान्
तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः श्लक्ष्णया
सूक्तया वाचा सर्वलोकगरीयसः २६ अत्रिरुवाच विश्वोद्भवस्थितिलयेषु विभज्यमानैः मायागुणैरनु
युगं विगृहीतदेहाः ते ब्रह्मविष्णुगिरिशाः प्रणतोस्म्यहं वः तेभ्यः क एव भवतां म इहोपहूतः २७

पिता तेषां रोचिषा दीप्त्या २५ श्लक्ष्णया मधुरया सूक्तया गंभीरार्थया २६ अनुयुगं कल्पे कल्पे विभज्य गृहीतदे
हा ये ते प्रसिद्धा ब्रह्मविष्णुगिरिशास्ते यूयं वः युष्मान् प्रणतोस्मि तेभ्यः सकाशादेकं एव मे मया उपहूतः शरणं ते
प्रपद्ये इत्येकस्यैव निर्दिष्टत्वात् स च युष्माकं कः इति युष्माभिरेव कथ्यतामित्यर्थः २७

3

श्री· भा·च· टी· ३

अस्य प्रपंच इति विविधैः प्रधानैरुपचारैः विबुधप्रधान इति वा पाठः प्रजननाय पुत्रोत्पत्त्यै चित्तीकृतः चित्तेनैकां
नीतः मनसोपि दूराः दुर्गोचराः संतः कथं नु त्रयोप्यागताः २८ २९ ते त्वया यथा कृतः संकल्पः तेन नूनं तथैव भाव्यं
नान्यथा यतः तत्संकल्पः तर्हि कथमेकस्मिन्ध्यायमाने त्रयाः प्राप्ताः प्रतीतास्य तत्राहुः यदेकं जगदीश्वराख्यं तव

एको मयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयं अत्रागतास्तनुभृतां मनसोपि दू
राद्ब्रूत प्रसीदत महानिह विस्मयो मे २८ मैत्रेयः इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः प्रत्याहुः
श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो २९ देवा ऊचुः यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा सत्सं
कल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयं ३० अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः भवितारोंग भ
द्रं ते विस्रप्स्यंति च ते यशः ३१ एवं कामवरं दत्वा प्रतिजग्मुः सुरेश्वराः सभाजितास्तयोः सम्यग्दंपत्यो
र्मिषतोस्ततः ३२ सोमोभूद्ब्रह्मणोंशेन दत्तो विष्णोस्तु योगवित् दुर्वासाः शंकरस्यांशो निबोधांगिरसः श्री हरि

भवान् ध्यायति तत्पते वयं त्रयोपि तदेवैकं तत्त्वं नास्माकं भेदोस्तीत्यर्थः ३० विस्रप्स्यति विस्तारयिष्यति अंतर्भूत
निजार्थस्य सदृग्गता विस्रप्स्यद्रूपं ३१ ताभ्यां सम्यक् सभाजिताः पूजिताः संतः ततः स्थानात्प्रतिजग्मुः ३२
निबोधत द्वयस्य ३३

३

3A

ताः कन्या निर्दिशति सिनीवालीति ३४ ३५ पुलस्त्य अगस्त्यं हविर्भुवि पत्न्यामित्यन्वयः सोऽगस्त्यः दह्राग्निर्जाठरः
विश्रवाश्च पुलस्त्यस्य सुत इति शेषः ३६ तस्य विश्रवसः इडविडायां जातः सुतः कुबेरः अन्यस्यां भार्यायां केशि

श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ३४ तत्पुत्रा
वपरावास्तां ख्यातौ स्वारोचिषेंतरे उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ३५ पुलस्त्योऽजनयत्प
च त्न्यामगस्त्यं च हविर्भुवि सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः तस्य यक्षपतिर्देवः कुबेरस्त्वि
डविडासुतः रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः ३७ पुलहस्य गतिर्भार्या त्रीनसूत सती सु
तान् कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ३८ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ऋषीन्षष्टि
सहस्राणि ज्वलतो ब्रह्मतेजसा ३९ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप चित्रकेतुप्रधानास्ते सप्त
ब्रह्मर्षयोऽमलाः ४० चित्रकेतुः सुरोचिश्च विरजा मित्र एव च उल्बणो वसुभृद्यानो द्युमान् शक्त्याद
योऽपरे ४१ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं दध्यञ्चमश्वशिरसं भृगोर्वंशं निबोध मे ४२

न्यां रावणादयस्त्रयः सुताः ३७ ३८ ज्वलतः प्रकाशमानान् ३९ चित्रकेतुप्रमुखा जज्ञिरे ते च सप्तर्षयो जाताः
४० तानेवाह चित्रकेतुरिति वसुभृद्यानो नामैकः शक्त्यादयोऽपरे अन्यस्याः पुत्राः ४१ ४२

श्री·
भा·ख·
टी·
४

ख्यात्यांपत्न्यांप्रजास्तुद्वेपुत्रीतानेवाह धातारमिति ४३ तयोर्धातृविधात्रोः ४४ कविश्चभार्गवःभृगोःपुत्रः
भृगुःख्यात्यांमहाभागःपत्न्यांपुत्रानजीजनत् धातारंचविधातारंश्रियंचभगवत्परां ४३ आयतिंनि
यतिंचैवसुतेमेरुस्तयोरदात् ताभ्यांतयोरभवतांमृकंडःप्राणएवच ४४ मार्कंडेयोमृकंडस्यप्रा
णाद्वेदशिरामुनिः कविश्चभार्गवोयस्यभगवानुशनासुतः ४५ सर्वेतेमुनयःक्षत्तःलोकान्सर्गै
र्भावयन् एषर्दैकंमदौहित्रसंतानःकथितस्तव शृण्वतःश्रद्दधानस्यसद्यःपापहरःपरः ४६ प्रसूतिं
मानवींदक्षउपयेमेह्यजात्मजः तस्यांससर्जदुहितृःषोडशामललोचनाः ४७ त्रयोदशादाद्धर्माय
तथैकामग्नयेविभुः पितृभ्यएकांयुक्तेभ्योभवायैकांभवच्छिदे ४८ श्रद्धामैत्रीदयाशांतिःतुष्टिः
पुष्टिःक्रियोन्नतिः बुद्धिर्मेधातितिक्षाह्रीर्मूर्तिर्धर्मस्यपत्नयः श्रद्धासूतशुभंमैत्रीप्रसादमभयंदया
शांतिःसुखंमुदंतुष्टिःस्मयंपुष्टिरसूयत ५० योगंक्रियोन्नतिर्दर्पमर्थंबुद्धिरसूयत मेधास्मृतिंतिति
क्षातुक्षेमंह्रीःप्रश्रयंसुतं ५१ मूर्तिःसर्वगुणोत्पत्तिर्नरनारायणावृषी ययोर्जन्मन्यदोविश्वमभ्यनं
दत्सुनिर्वृतं ५२ मनांसिककुभोवाताःप्रसेदुःसरितोद्रयः दिव्यवाद्यंततूर्याणिपेतुःकुसुमवृष्टयः ५३
४५ ब्रह्मापतेःसर्वैलोकानभावयन् ४६ अजात्मजःब्रह्मपुत्रः ४७ युक्तेभ्यःसंयतेभ्यःमिलितेभ्योवा ४८

[illegible] ५१ ५३

४

५७

अभिष्टवैः स्तुतिभिः ५४ निजयामायययायस्मिन्नात्मनि विगगने रूपभेदं गंधर्वनगरमिव इदं विश्वं विरचि
तं तस्यात्मनः प्रतिचक्षणाय प्रकाशनाय आत्मानं योद्यप्राडस्मकार प्रकटितवान् तस्मै पुरुषाय नमः किं
रूपेण प्राडस्मकार ऋषेर्मूर्तिराकारो यस्मिन्नेतेनैतेन रूपेण ५५ सोयं नोस्मान् सुरगणान् अनल्पकरुणा

अनयस्तत्वुस्त्वृष्टाजगुर्गंधर्वकिन्नराः नृत्यंति स्म स्त्रियो देव्य आसीत् परममंगलं देवाब्रह्मादयः
सर्वे उपतस्थुरभिष्टवैः ५४ योमायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणा
य एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ५५ सोयं स्थितिव्यतिक
रोपशमाय सृष्टान्सत्वेन नः सुरगणाननुमेयतत्त्वः दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनि
केतममलं क्षिपतारविंदं ५६ एवं सुरगणैस्तात भगवंतावभिष्टुतौ लब्धावलोकैर्ययतुरर्चितौ
गंधमादनम् ५७
णेन विलोकनेन विशिष्टनेत्रेण दृश्यात् पश्यतु कथंभूतेन यच्छ्रीनिकेतममम
लमरविंदं तत् क्षिपता तिरस्कुर्वता कथंभूता अनुमेयं शास्त्रतो विचार्यं न त्वस्माकमपरोक्षं तत्त्वं यस्य कथंभू
तानस्मान् स्थितेर्जगन्मर्यादाया व्यतिकरोन्यथात्वं तस्योपशमाय सत्वेन गुणेन सृष्टान् ५६ लब्धोवलोको
यैः सुरगणैस्तैरभिष्टुतौ अर्चितौ ययतुः ५७

5

श्री· भा·च· टी· ५

भुवोभारस्यव्ययायनाशाय चकारपूर्वकवाक्यत्वार्थः तौ च सांप्रतमिहागताविल्यर्थः तदुक्तं तन्त्रे अर्जुनेतव
रावेशः कृष्णोनारायणः स्वयमिति यदूद्वहः श्रीकृष्णः कुरूद्वहोऽर्जुनः उभावपिकृष्णनामानौ ५८ अग्न्यभिमानि
नीदेवता स्वाहानामतस्यभार्या हुतभोजनमितित्रयाणांविशेषणं ५९ पितरस्त्रयः पितामहएकः तैः साकं

ताविमौवैभगवतोहरेरंशाविहागतौ भारव्ययायचभुवः कृष्णौयदुकुरूद्वहौ ५८ स्वाहाभिमानि
नश्चाग्नेरात्मजांस्त्रीनजीजनत् पावकंपवमानंचशुचिंचहुतभोजनं ५९ तेभ्योऽग्नयः समभवंश्च
त्वारिंशच्चपंचच तएवैकोनपंचाशत्साकंपितृपितामहैः ६० वैतानिकेकर्मणियन्नामभिर्ब्रह्मवादि
भिः आग्नेय्यइष्टयोयज्ञेनिरूप्यंतेऽग्नयस्तुते ६१ अग्निष्वात्ताबर्हिषदः सौम्याः पितरआज्यपाः साग्नयो
नग्नयस्तेषांपत्नीदाक्षायणीस्वधा तेभ्योदधारकन्येद्वेवयुनांधारिणींस्वधा उभेतेब्रह्मवादिन्यौज्ञा
नविज्ञानपारगे ६३ भवस्यपत्नीतुसतीभवंदेवमनुव्रता आत्मनः सदृशंपुत्रंनलेभेगुणशीलतः ६४

सह ६० वैतानिकेवैदिकेकर्मणियज्ञे तेषांनामभिरग्निदेवताकाइष्टयोनिरूप्यंतेक्रियंतेतएतेऽग्नयोनलौकिकाः
अग्नावहुतानांनैवेद्यमिति भावः ६१ सौम्याः सोमपाः येषांमध्येकरणमस्तितेसाग्नयः तद्रहितास्त्वनग्नयः ६२
तयोस्तुसंततिर्नाभवत् जीवन्मुक्तत्वादित्याह उभेतेइति ६३ गुणशीलतआत्मनः सदृशंदेवमनुव्रतापिसती ५

5A

तत्रहेतुः स्वपितरिदत्तेश्वप्रतिरूपेश्रद्दशोप्रतिकूलेसतीत्यर्थः आत्मनास्वयमेवात्मानंदेहमजहात् त्यक्तव
तीयोगसंयुतायोगमाश्रितेति ९ इतिभावार्थेचतुर्थस्कंधेप्रथमः १ द्वितीयेप्रथमाध्यायोपत्तिमभवदक्ष
योः विद्वेषेवर्ण्यतेदेहविस्रष्टृयज्ञसंभवः १ सतींसतीनाम्नी २ नचासौकस्यविद्वेषार्हइत्याह कइति चरा
पितर्यप्रतिरूपेस्वेमवायानागसेरुषा आपोऽन्वात्मनात्मानमजहद्योगसंयुता ५५ इतिश्रीभागव
तेचतुर्थेप्रथमः १ विदुरउ० भवेशीलवतांश्रेष्ठेदक्षोदुहितृवत्सलः विद्वेषमकरोत्कस्मादनादृ
त्यात्मजांसतीं १ कस्तंचराचरगुरुंनिर्वैरंशांतविग्रहं आत्मारामंकथंद्वेष्टिजगतोदैवतंमहत् २
एतदाख्याहिमेब्रह्मन्जामातुःश्वशुरस्यच विद्वेषस्तुयतःप्राणांस्तत्यजेदुस्त्यजान्सती ३ मैत्रेयः पु
राविश्वसृजांसत्रेसमेताःपरमर्षयः तथामरगणाःसर्वेसानुगामुनयोग्नयः ४ तत्रप्रविष्टमृषयोदृ
चरगुरुंजगतोदैवतंचतंकोद्वेष्टिकथंचनिर्वैरं \ ष्ट्वार्कमिवरोचिषा भ्राजमानंवितिमिरंकुर्वंतंतन्महत्सदः ५
द्वेष्टि निर्वैरत्वेहेतु भावोक्तः शांतंशांतएवविग्रहोयस्य अतःआत्मन्येवरामोरतिर्यस्यतं यद्वा कःप्रजाप
तिःदक्षःकथंद्वेष्टिएवभूतेतस्मिन्द्वेषोऽनुक्तोःशक्यइत्यर्थः २ यतोहेतुर्विद्वेषः यतोविद्वेषात् प्राणांस्त
त्याजएतदाख्याहि ३ नदेवाख्यातमितिहासंप्रस्तौति पुरेति समेताआसन् ४ प्रविष्टंदक्षमितिशेषःमहत्स

6
श्री॰
भा॰ च॰
९

स्वधितिभ्यः स्वीयास्तेभ्यः ६० प्राक्स्वीयवेशनात्सर्वमेवनिषण्णमुपविष्टं मृडं शिवं तदनाद्दृतः तेनाभ्यु
त्थानादिभिरकृतादरः नामृष्यन्नासहत वामं वक्रं यथा भवति तथाभिवीक्ष्य ८ मे वचनं शृणुतो अज्ञाना
न्मत्सराद्ब्रुवतः ९ सत्वेन उचितक्रियासमेन धर्मेणेतिपाठभ्रष्टेन १० तदेवाह पश्यतेति यद्यस्मात् वि

उदतिष्ठन्नदस्मात्ते स्वधितिभ्यस्तस्मायः ज्ञातेविरिंचशर्वच तज्ज्ञात्वाप्तिमचेतसः ९ सदस्पतिभिर्द
तो भगवान्साधुसत्कृतः अजं लोकगुरुं नत्वा निषसाद तदाज्ञया प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनाद
तः उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ८ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः साधूनां ब्रुवतो
म वृत्तं नाज्ञानान्नच मत्सरात् अयं तु लोकपालानां यशोघ्नो निरपत्रपः सद्भिराचरितः पंथा येन स्तब्धेन दूषितः
१० एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् गृहीत्वा मृगशा
वक्ष्याः पाणिं मर्कटलोचनः प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितं १२ लुप्तक्रियायाशुचये मानिने भि
प्राग्निसमर्हं तां साविग्नीत्वन्यायामेड दुहितुः पाणिमग्रहीत् ११ मृगशा \\ न्नसेतवे अनिच्छन्नप्यदां बालां शूद्रायेवोश
वक्ष्य दृशिणा वा नस्यात्ति णीवात्तिणी यस्याः प्रत्युत्थानाभिवादार्हे मयि उचितं संमानं वाचापि नाकरोत् १२ अन
र्हाय कन्यादत्तेत्यनुतप्यमान आह लुप्तक्रियायेति मार्यै स्तुतिभिः उशतीं वेदलक्षणां गिरम् १३

९

6A

प्रेतावासेषु श्मशानेषु अबुनादिविकीर्णकेशाय स्य ४ चितादिभस्मनाहृतं स्नानं येन प्रेतानां स्रजो माल्यानि य
स्य स प्रेतस्रक् नृणां अस्थीनि भूषणानि यस्य शिव इत्यपदेशो नाममात्रं यस्य ५ तमोमात्रात्मकः केवलं तमोरू
प आत्मा स्वभावो येषां उन्मादाभूतविशेषास्तेषां नाथाय दुर्हृदे दुष्टचिताय वते ति खेदे वास्तवस्त्वयमर्थः ल
माः क्रिया यस्मिन् परब्रह्मरूपत्वात् अतएव नास्ति शुचिर्यस्मात् अमानिने अभिन्नसेन व इति च च्छेदः तस्य प
रमेश्वरस्य मदीया मानुषी कन्या कथं देया स्यादिति लज्जादिना दातुमनिच्छन्नपि तस्सैव पलोभेन दत्तवान् ॥

प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः अटत्युन्मत्तवद्ग्राव्युप्तकेशो हसन्रुदन् ४ चिताभस्मकृत
स्नानः प्रेतस्रग्नास्थिभूषणः शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः ५ पतिः प्रथमभूतानां तमोमा
त्रात्मकात्मनां तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे दत्ता वत मया साध्वी चोदितेन परमेष्ठिना ६

द्राघेत्यनर्हमात्रे हृष्टांतेन हीनत्वे दुर्वापरस्ववचनविरोधापत्तेः एतदुक्तं भवति यथा कश्चिद्दरिद्राय वेदम
पैलोभेन ददाति तद्वदिति प्रेतादिवासेष्वित्यादि सर्वं विडंबनमात्रमिति स्वयमेतिवाह उन्मत्तवदिति अत्र स्य
या उन्मत्त इव वावस्यत् अशिवः नास्ति शिवो यस्मात् अमत्तो मत्तजनप्रिय इति च्छेदः पतिः प्रमथभूता
नामिति भक्तवात्सल्यमाह तामसानपि दोषमनीय पातीति नष्टानामपि शौचं शुद्धिर्यस्मात् दुष्टहृदे तेम

7
श्री॰
भा॰च॰
टी॰
७

यानुक्तं यान् शतिरुद्रमनो यस्य सम उद्दह्न तस्मैव वर्तेतिति हेदृषे ब्रह्मणो वा कालज्ञाभयादिकं पप्रीत्यज्यदत इत्य
र्थः १६ अप्रतीपमप्रतिकूलं यथा भवत्येवमवस्थितमपि विनिंद्य १७ देवानां यजनसमये देवैः सह भागं न ल
भतां किंतु तेभ्यः पूर्वमेव लभतां अग्रभोजित्वा यद्वा नेषु भक्तवत्सल भतां सर्वपोषकत्वात् अत्र हेतुः देवगणा

मैत्रेयः विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं दक्षोथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे १७ अयं तु दे
वयजन इंद्रोपेंद्रादिभिर्भवः सह भागं न लभतां देवैर्देवगणाधमः १८ निषिध्यमानः स सदस्यमुख्यै
र्दक्षो गिरित्राय विसृज्य शापं तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतं १९ विज्ञाय शापं
गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्य
तां द्विजाः २० य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् २१

ऽधमो यस्मात्सः १८ स दक्षस्तस्मात्स्थानाद्विनिष्क्रम्य जगाम हे कौरव्य १९ गिरिशस्यानुगानामग्रणीर्मुख्यः
रोष एव कषायस्तेन दूषितः आरक्तनेत्र इत्यर्थः तस्य गिरिशस्यावाच्यतां वचनानर्हतां निंद्यतामित्यर्थः तेभ्यो
पि शापं विससर्ज २० दक्षं शपति सार्धैः त्रिभिः य एतन्मर्त्यं दक्षशरीरं उद्दिश्य श्रेष्ठं मत्वा अप्रतिद्रुहि प्रतिद्रोहम
कुर्वति पृथग्दृष्टिः भेददर्शी तत्त्वतः परमार्थात् भवेत् भवतीत्येकः शापः २१ ७

7A

अतत्वमेवाह गृहेष्विति कर्मतंत्रंकर्मपरिकरं वेदेयेवादाः अर्थवादाः अक्षय्यंहवैचातुर्मास्ययाजिनः
सुकृतंभवतीत्यादयस्तैः विपन्नाविनष्टाधीर्यस्य २२ परोदेहादिः तमेवात्मत्वेनाभितोध्यातुंशीलंयस्याः त
याबुद्ध्याविस्मृताआत्मनोगतिस्तत्वंयेन अतःपशुतुल्यः अतितरांस्त्रीमोस्त्वितिद्वितीयःशापः वस्तस्यमुख का
मिवमुखंयस्येतितृतीयःशापः २३ अयंचशापोस्यानुरूपवेत्याह विद्याबुद्धिः इयमेवतत्वविद्येतिबुद्धिर्य।

गृहेषुकूटधर्मेषुसक्तोग्राम्यसुखेच्छया कर्मतंत्रंवितनुतेवेदवादविपन्नधीः २२ बुद्ध्या
पराभिध्यायिन्याविस्मृतात्मगतिःपशुः स्त्रीकामःसोस्त्वतितरांदक्षोबस्तमुखोचिरात् २३
विद्याबुद्धिरविद्यायांकर्ममय्यामसौजडः संसरंत्विहयेचामुमनुशर्वावमानिनं २४ गिरः
श्रुतायाःपुष्पिण्यामधुगंधेनभूरिणा मथ्नाचोन्मथितात्मानःसंमुह्यंतुहरद्विषः २५

स्यातोसौजडएवद्विजाननुशपतिसंसरंत्वितिद्वाभ्यां शर्वमवमन्यतइतितथाभूतंदक्षंयेचानुवर्तंते तेसंस
रंतुजन्ममरणाद्यनुभवंत्वित्येकःशापः २४ श्रुतायावेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादाः मनः।
क्षोभकत्वात् अर्थवादबहुलायाइत्यर्थः मधुगंधतुल्येनप्ररोचनेन मथ्नामनःक्षोभकेन उन्मथितआ।
त्मामनोयेषांतेसंमुह्यंतुकर्मस्वासक्ताभवंत्वितिद्वितीयः २५

4

श्री· भा·च· टी· ८

सर्वभक्ष्याः भक्ष्याभक्ष्यविचारशून्याः हृत्वैदेह्यादिपोषणाय धृतानि विद्यातपोव्रतानि यैः वित्ताद्यर्थं वा रामोर
तिर्येषां ते याचकाः सन्तो विचरंत्विति च शापं चतुष्टयं २६ प्रत्यसृजत् प्रत्यदात् शापरूपं ब्रह्मदंडं २७ सच्छा
स्त्रपरिपंथिनः प्रतिकूलाः २८ सुरागौडीपैष्टीमाध्वीच आसवः तालादिसंभवं मद्यं द्वैहैकाच्छवतं तयत्रदैः

सर्वभक्ष्या द्विजा वृत्त्यै धृतविद्यातपोव्रताः वित्तदेहेंद्रियारामा याचका विचरंत्विह २६ तस्यैवं वदतः शा
पं श्रुत्वा द्विजकुलाय वै भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययं २७ भवव्रतधरा ये च ये च तान्समनुव्र
ताः पाषांडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः २८ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः विशंतु
शिवदीक्षायां यत्र दैवं सुरासवं २९ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ सेतुं विधारणं पुंसामतः पा वे
षंडमाश्रिताः एष एव हि लोकानां शिवः पंथाः सनातनः यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ३०
तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् विगर्ह्य यात पाषांडं दैवं वो यत्र भूतराट् ३१

वं एत्यं देवता वदा दद्दाति यमितिवा २९ व्रह्मवेदं कथंभूतं सेतुं मर्यादारूपं तदेवाह पुंसां वर्णाश्रमाचारव
तां विधारणं धारकं ३० सेतुत्वं प्रपंचयति द्वाभ्यां एष वेदलक्षण एव शिवः पंथाः येन पूर्वे ऋषयः अनुसंतस्थु ८
राश्रितवंतः यत्र यस्मिन् जनार्दनः प्रमाणं मूलं ३१ भूतराट् भूतानां राजा भूतानां पतिः ३२

8A

अन्योन्यशापेनोभयोः शापाद्विमना इवेति तथापि भगवदनुगृहीतानां नाशो न स्यादिति भावः ३३ ऋषभः
सर्वश्रेष्ठो हरिः यज्ञ इष्टः इज्यः ३४ ततस्ते सत्रं सम्यग्विधाय हे महेष्वास विदुर यत्र प्रयागे अन्वितास्तत्राव
भृथस्नानं कृत्वा ततः स्थानानाययुः ३५ इति चतुर्थे द्वितीयः २ तृतीये तु सतीतातयज्ञोत्सवदिदृक्षया ग

मैत्रेय उ॰ तस्यैवं वदतः शापं भृगोः स भगवान्भवः निश्चक्राम ततः किंचिद्विमना इव सानुगः ३३
तेपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् संविधाय महेष्वास यत्रेज्य ऋषभो हरिः आप्लुत्याव
भृथं यत्र गंगा यमुनयान्विता विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ३५ इति चतुर्थे द्वितीयो।
ध्यायः २ मैत्रेय उ॰ सदा विद्विषतोरेवं कालो वै ध्रियमानयोः जामातुः श्वशुरस्यापि सुमहान
तिचक्रमे १ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना प्रजापतीनां सर्वेषामाधिपत्ये स्मयोभ
वत् २ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च बृहस्पतिसवं नाम समारेभे क्रतूत्तमं ३

मिच्छंतीमहद्देशेनवावितानीतिदेहभिः १ ध्रियमाणयोः वर्तिष्यमानयोः धृङ् अवस्थान इत्यस्मात् १ रुद्रवि
हीनो यतो नास्त्येव तथापि दक्षस्य हृद्परित्यागो द्वेषाद्ध्वीं च तत्र द्वेषो हेतुरुक्तः गर्वं हेतुमाह यदा तु प्र
जापतीनामाधिपत्येऽभिषिक्तः तदा तस्य स्मयो गर्वोऽभवत् १ गर्वादेव ब्रह्मनिष्ठान्सर्वानभिभूय तिरस्कृत्य

वाजपेयेनेष्ट्वा बृहस्पतिसवं नाम कृतुः वाजपेयेनेष्टेभ
गारेभे १

कृतस्वस्त्ययनाः कृतमंगलाः सभर्तृकाः इति दत्तिणादिभिः प्रथममर्हितानामपि पत्न्यर्हणे पुनर्हणमु
क्तं ४ ततस्तदा खेचराणां प्रजल्पतां मता पितृयज्ञमहोत्सवं श्रुत्वा ५ तत्र व्रजंतीरुपदेवानां गंधर्वादी
नां वराः स्त्रियश्च स्वस्य निलयस्याभ्याशे समीपे दृष्ट्वा उत्सुक्यात्पतिमित्यभाषतेति त्रयाणामन्वयः क

तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ४ त
दुपश्रुत्य नभसि खेचराणां प्रजल्पतां सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ५ व्रजंतीः स
र्वतो दिग्भ्य उपदेववरस्त्रियः विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः ६ दृष्ट्वा स्वनिलया
भ्याशे लोलाक्षीर्मृष्टकुंडलाः पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ७ सत्युवाच प्रजापते
स्ते श्वशुरस्य साम्प्रतं निर्यापितो यज्ञमहोत्सवः किल वयं च तत्राभिसराम वाम ते यद्यर्थिता

यं भूताः स्त्रियो दृष्ट्वा विमानानि यानानि यासां ता प्रेष्ठैः सहिताः \\ मी विबुधा व्रजंति हि ८
निष्कानि पदकानि कंठेषु यासां ता शोभनानि वासांसि यासां ता ६ लोलानि चंचलान्यक्षीणि यासां ता मृष्टा
न्युज्ज्वलानि कुंडलानि यासां ताः ७ निर्यापितः प्रवर्तितः हे वाम शिव ते यद्यर्थिता इच्छा तर्हि वयं त ९
त्राभिसराम गच्छाम न च अद्यापि योगो निवृत्तः यतोऽमी विबुधा व्रजंति ८ जं

9A

ऊैत्मकं प्रकटयंस्त्याह तस्मिन्निति षड्भिः पितृभ्यामुपनीतं दत्तं परिवर्हमलंकारादिद्रव्यं भवतामहृत्य्रा
र्हितं स्वीकर्तुं कामये अर्हितमितिपाठे सत्कृतं परिवर्हमिच्छामीति ५ स्वसृः भगिनीः भर्तृभिः समि
प्रवर्तमानं
ताः सदृशीः स्त्रिन्नधियं स्नेहाद्दीचितो चिरमुत्कंठमुत्सकं मनोयस्याः साहं द्रष्टुमिच्छे मर७ उन्नीयमा
ने अधरे भुजमिव दष्टयंस्त्रेष्टमधरं यद्वा उत्तिष्यमाने यज्ञे के तद्दष्टयेवा ६ अहोकिंतदाश्चर्यं येन तवै

तस्मिन्भगिन्यो मम भर्तृभिः स्वकैः ध्रुवं गामिष्यंति सहृद्दिद्दृक्षवः अहं च तस्मिन्भवताभि
कामये सहोपनीतं परिवर्हमर्हितं ९ तत्र स्वसृमैंनतु भर्तृसंमितामातृष्वसृः स्त्रिन्नधियं च मा
तरं द्रष्टुं चिरोत्कंठमनामहर्षिभिरुन्नीयमाने च मृडाध्वरध्वजे ९ त्वय्येतदाश्चर्यमजात्ममा
यया विनिर्मितं भाति गुणत्रयात्मकं अथाप्यहं योषिदतत्वविच्च ते दीना दिदृक्षे भव मे भव
क्षितिं ११ पश्य प्रयांतीरभवान्ययोषितोप्यलंकृताः कांतसखा वरूथशः यासां व्रजद्भिः शितिकं

तदैत्मकं भवति इति चेदत आह त्वयीति हे अजपतदिश्वमाश्चर्यरूपं त्वय्येव [illegible] तन्मायया रचितं विभा
ति अतो यद्यपि तवतत्र नाश्चर्यबुद्धिः तथाप्यहं योषित् उत्सकस्वभावात् तवतत्वं न जानामि अतो दीनाकु
पणा सती हे भव मे भव क्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ११ दिदृक्षामेव कैमुत्यन्यायेन व्यनक्ति पश्य

10

श्री·
भा·च·
टी·
१०

त्वयानास्वादितमितिभावः अन्योयोषितः संबंधरहिता अपि प्रयांतीः पश्यकांतसखाभर्तृसहिताः व
हुयशः संवृशः कथंभूतायाः सा विमानैर्नभोमंडितं ताः हे शितिकंठ नीलकंठेति परानुग्रहाय त्वया वि
षयमपिभक्षितमितिसूचयति १२ हे हरश्रेष्ठ पितृगेहोत्सवं निशम्य सुतायादेहं कथंनेंगतहृष्टं न प्रच
लति तथापि नाहूताः संतः कथं गच्छाम सत्यावाह सोहृ देसहृदः केतनं शृहं तथा भर्त्रा नांच शृहं अनाहूता

कथं सुतायाः पितृगेहकौतुकं निशाम्य देहः सुरवर्य नेंगते अनाहुता अप्यभियंति सौहृदं भ
र्तुर्गुरोर्देहकृतश्च केतनं १३ तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान्कारुणिको वताहति
त्वयात्मनोर्धेहमदभ्रचक्षुषा निरूपिता मानुगृहाण याचितः १४ ऋषिरुवाच एवं गिरित्रः प्रि
ययाभिभाषितः प्रत्यभ्यधात्तं प्रहसन्सुहृत्प्रियः संस्मारितो मर्मभिदः कुवागिषून्याना
हको विश्वसृजां समक्षतः १५

अप्यभियंति संतः हे स्वमार्ष १३ हे अमर्त्य तत्तस्मात्प्रसीद यत ३
दं मे वांछितं कर्तुं भवानर्हति कारुणिक त्वमेवाह अभ्रचक्षुषा अनल्पज्ञानेनापि त्वयात्मनो देहस्यार्धे
अर्धं निरूपिता भूता यतोर्धनारीश्वर इति ख्यातोसि अतो मामनुगृहाण याचितः सन् १४ अभिभाषि
तोभियावितः कः दत्तः यानाह मर्मभिदं इति येतान् कुवागिषून्सहन्कि न संस्मारितः सन् १५ १०

10A

अनाहूताअपीतित्वयायदुदितमुक्तंतच्छोभनमेव किंतु अनात्म्यंदेहादावहंकारस्तत्कृतेनमदेनमन्यु
नाचतेबंधवोयद्यनुत्पादितदोषदृष्टयोभवंति तर्हि नउत्पादितेआरोपितेदोषदृष्टिर्येषांते १६ ननुवि
द्यादिगुणयुक्तोदक्षः तादृशेषुमहत्सुकथंदोषदृष्टिर्भवेत्तत्राह विद्याभिरेवसंस्मृतौहतायांविवेकज्ञा
नेनष्टेसति भूयसांमहत्तमानांधामतेजोनपश्यंतिहि ननुगुणैःकथंविवेकनाशस्तत्राह सतांगुणैर्वि

श्रीभगवानुवाच त्वयोदितंशोभनमेवशोभने अनाहूताअप्यभियंतिबंधुषु तेयद्यनुत्पादित
दोषदृष्टयोबलीयसानात्म्यमदेनमन्युना १६ विद्यातपोवित्तवपुर्वयःकुलैः सतांगुणैःषड्भि
रसत्तमेतरैः स्मृतौहतायांभृतमानदुर्दृशःस्तब्धानपश्यंतिहिधामभूयसां १७ नैतादृशानां
स्वजनव्यपेक्षयागृहान्प्रतीयादनवस्थितात्मनां येऽभ्यागतान्वक्रधियाभिचक्षतेआरोपितभ्रू
भिरमर्षणाक्षिभिः १८

वेकज्ञानेनष्टेसति भूयसांमहत्तमानांधामतेजोनपश्यंतिहि ननुगुणैः
कथंविवेकनाशस्तत्राह वेकहेतुभिरपिअसत्तमानामितरैःदोषभूतैः अतएवतैर्भृतःहतपुष्टोवा अहंवि
द्वानतापसइत्यादिमानोगर्वस्तेनदुष्टादृष्टिर्येषांते १७ स्वजनव्यपेक्षयाबंधुदृष्ट्याग्रहान्नप्रतीयात् नावलो
येन अनवस्थितचित्तत्वमेवाह येवक्रयाकुटिलयाबुद्ध्यापश्यंति आरोपिताउन्नमिताभ्रूर्येषुतान्यारोपितभ्रूणि

नेतानोपितभ्रूरितिवा १८

॥ श्री· भा·च· टी ॥

ननुस्वजनानांगृहंसुहृद्भिर्गंतव्यंतेषांदुःचेष्टितंचसोढव्यंनतत्सोढुःसहत्वादित्याह तथेति अरिभिःशि
लीमुखैःबाणैःअर्दितोगःखंडितगात्रोपितथानव्यथते यतःशेतेस्वपिति स्वानांदुरुक्तिभिर्मर्मसुताडि
तोयथाहृयताव्यथमानेनहृदादिवानिशंतप्यति १९ मयितत्रगतायांनेष्टशंकेतिचेत् तत्राह व्यक्तेति
स्थितंमुत्कृष्टागतिःस्थितिर्यस्यतस्यात्मजानांकन्यानांमध्येत्वंप्रियेतिमेसंमतासि पितुःसकाशात् मा

तथारिभिर्नव्यथतेशिलीमुखैःशेतेर्दितांगोहृदयेनदूयता स्वानांयथावक्रधियांदुरुक्ति-
भिर्दिवानिशंतप्यतिमर्मताडितः १९ व्यक्तंत्वमुत्कृष्टगतेःप्रजापतेःप्रियात्मजानामसिसुभ्रुसं
मता अथापिमानंनपितुःप्रपत्स्यसेमदाश्रयात्कःपरितप्यतेयतः २० पापच्यमानेनहृदातुरें
द्रियः समृद्धिभिःपूरुषबुद्धिसाक्षिणां अकल्पएषामधिरोढुमंजसापरंपदंद्वेष्टियथाःसुरा

नंनलप्स्यसेमदाश्रयान्मत्संबंधात् २० ननुभगवन्त्वयाकिमितिदक्षस्तिरस्कृतोयतो ॥ हरिं २१
मोतोद्वेष्टितत्राह पापच्यमानेनलेदह्यमानेनहृदादुःखितेंद्रियःकाभिः पुरुषोजीवस्तस्यबुद्धिसाक्षि
णंतत्साक्षिणांनिरहंकारिणामित्यर्थः समृद्धिभिःगुणैःकीर्त्यादिभिः पर्वापदंस्यानेश्वर्यंप्राप्तमकल्प ॥
अशक्तःसन् परंपदंद्वेष्टिअसुरायथाहरिंकेवलंद्वेष्टिति २१

11 A

ननु त्वया प्रत्युत्थानविनयाद्यकरणादवज्ञात एवासौ तत्राह हे सुमध्यमे प्रत्युद्गमादिकं मिथो जनैर्य
द्विधीयते तत्प्राज्ञैः साधु विधीयते साधुत्वमेवाह परस्मै श्रीवासुदेवाय गुहाशयायान्तर्यामिण एव तच्चेत
सैव परिहरणीं तस्मिन्कायिकव्यापारायोगात् अतोन्तर्यामिदृष्ट्या मनसा सर्वं कृतमिति भावः २२ किंच
न केवलमभ्यागतेष्वेव वासुदेवदृष्ट्या नमनं क्रियते किं तु नित्यमेव मनसि वासुदेवश्चिन्त्यत इत्याह विशु
द्धं सत्त्वमन्तःकरणं सत्त्वगुणो वा वसुदेवशब्दितं वसुदेवशब्देनोक्तं कुतः यद्यस्मात् तत्र तस्मिन्सत्त्वे पुमान्वा

प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे प्राज्ञैः परस्मै पुरुषाय चेतसा गुहा
शयायैव न देहमानिने २२ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः सत्त्वे च त

सुदेव ईयते प्रकाशते अपगतमावृतमावरणं य // स्मिन्भगवान्वासुदेवो ह्यधोक्षजो मे नमसा विधी

स्मात्स अयमर्थः वसुदेवे भगवान् प्रतीयत इति हि वासुदेवः परमेश्वरः प्रसिद्धः स च विशुद्धे सत्त्वे प्रतीय
ते अतः प्रसयार्थेन प्रसिद्धेन प्रकृतस्यार्थो निवार्यते ननु वासयति देवमिति वसुः सत्त्वं वा वसत्यस्मिन्निति
वासुदेवः दीव्यते द्योतते इति वा वसुभिः गुणैर्दीव्यति प्रकाशते इति वा वसुदेवशब्दवाच्यं शुद्धसत्त्वं ततः
किमत आह सत्त्वे च तस्मिन्मे मया नमसा नमस्कारेण तु विधीयते मन्यत इत्यर्थः मनसेति पाठे मनसा विशे

12

श्री॰ भा॰ च॰ टी॰ १२

येनाधीयते धार्यते चिंत्यत इत्यर्थः स यतः अधोक्षतेषु प्रत्याहृतेष्वक्षेषु जायते प्रकाशते इंद्रियागोचर इत्य
र्थः २३ तस्मान्नद्रष्टव्यो न निरीक्ष्यः देहकृद् प्रीतिपोषकत्वादित्यौपचारिकपितृत्वव्यावृत्त्यर्थं द्विट् शत्रुः त
द्वैवाह देहेन वैरोद्वृत्तः विश्वसृजां यज्ञगतं मां निरपराधं तिरस्करोति तिरस्कृतवान् २४ विपक्षे दोषमाह य
दीति महद्वचोतिहायातिक्रम्य यतः संभावितस्य सप्रतिष्ठस्य यदा भवति तदा स पराभवः तस्य मरणाय

तेनैनिरीक्ष्यो न पितापि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये यो विश्वसृग्यज्ञगतं वरोरु मामना
गसं दुर्वचसाकरोत्तिरः २४ यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति संभावि
तस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते २५ इति श्रीभागवते चतुर्थे तृतीयः ३ मै
त्रेयः एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् सुहृद्दिदृक्षुः परिशंकिता भ
वान्निष्क्रामती निर्विशती द्विधाससा १ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदंत्यश्रुकलातिविह्व

कल्पते २५ इति चतुर्थे तृतीयः ३ चतुर्थेपि पतिं द्विष्टा गता पित्रावमानिता रुषा निर्भर्त्स्य तं यद्वेजहौ देहमितीर्यते १
उभयत्राप्यनुज्ञाते बलान्निवारणे च सुहृद्दिदृक्षुः निष्क्रामती भवात्परिशंकिता पुनर्निर्विशती च तदा सा सती द्विधा सब
भूव १ सुहृदां दिदृक्षायाः प्रतिघातेन दुर्मनाः अश्रूणां कलाभिः लेशैरिति विह्वलाः व्याकुला अप्रतिरूपं हसमान

हि

12A

ततस्तं विहाय पित्रोर्गृहानगात् कथंभूतं यः प्रीत्या तस्मै आत्मनो देहस्यार्धमदात् त्यागे हेतुः स्त्रैणं पत्नीस्व
भावस्तेन विमूढा धीर्यस्याः सा ३ द्रुतविक्रमा शीघ्रं गच्छन्ती सह पार्षदैर्ये देवाश्च वर्त्तमानाः मणिमान्मद
श्वादिर्येषां ते पुरः पुरतो वृषेंद्रो येषां ते गतव्यथा निर्भयाः रुद्रातिक्रमेण तस्या गमनादागतव्यथा इति।
वा ४ तां वृषेंद्रमारोप्य शारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिः सह विटं

ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा पित्रोरगात्स्त्रैणविमूढधीर्गृहा
न्प्रेम्णात्मनो योर्धमदात्सतां प्रियः ३ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः स
य हस्रशः सपार्षदक्षा मणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ४ तां शारिकाकंदु
कदर्पणांबुजैः श्वेतातपत्रव्यजनस्रगादिभिः गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य
विटंकिता ययुः ५ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः मृद्दार्वयःकां
चनदर्भचर्मभिर्निसृष्टभांडं यज

किताः शोभिताः ययुः शारिका पठनविद्रूपिता पक्षिणी गीतायनैः
गीताश्रयैः ५ आसमंताद्घोषो वेदघोषस्तेनोर्जितं शोभमाने यज्ञसंबंधिपशुविशसनं यस्मिन् यद्वा तेभ्यो
र्जितमतिशयितं यज्ञवैशसं परस्परं स्पर्धा यस्मिन् तत् यजनं यज्ञस्थानं समाविशद्देवी विबुधैश्च तद्दृष्टं सदा

13

श्री॰
भा॰ च॰
टी॰
१२

कश्चननाद्रियत् नादृतवान् यज्ञकृतो दक्षात् यद्भयं तस्मात् तत्र हेतुः तेन विमानितां स्वसॄर्जननीं च ऋते तेन वि
नाताः स्वसादराः परिषस्वजुरालिंगितवत्यः प्रेमाश्रुभिर्निरुद्धः कंठो यासां ७ अप्रतिनंदिता नादृता सती ना
दत्त न गृहीतवती कथं सौदर्येण समोदरत्वेन भगिनीनां यः संप्रश्नः तत्र समर्था योग्या या वार्ता तया सहदत्तां च ना
दत्त नाशृणोदित्यर्थः ८ न विद्यते रुद्रस्य भागो यस्मिंस्तं देवे रुद्रे कृतं हेलनं अवज्ञानं आह्वानाद्यकरणात् ९

२ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः प
रिषस्वजुर्मुदा ८ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरं दत्तां सपर्यां वरमासनं च सा ना
दत्त पित्राप्रतिनंदिता सती अरुद्रभागं तमवीक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ अनादृता यज्ञसदस्य
धीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ९ जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयं स्वतेजसा
भूतगणान्समुत्थितान्निगृह्य देवी जगतोऽभिशृण्वतः देव्युवाच न यस्य लोकेऽस्त्यतिशायनः प्रियः तथाप्रि यः

जगर्ह निंदितवती अमर्षेण कोपेन विपन्ना अव्यक्ता तया शिवं द्वे देहभृतां प्रियात्मनः तस्मिन्समस्तात्मनि मुक्तवैर
ष्टीति शिवद्विट् तं धूमपथः कर्ममार्गः तत्र श्रमः अभ्यासस्तेन स्मयो गर्वो यस्य दक्षवधाय समुत्थितान् भूतगणान् स्वाज्ञा
यानिगृह्य निवार्य १० निंदामेवाह न यस्येति त्रयोदशभिः मुक्तवैरके न्यक्कृतविरोधे तस्मिन् शिवे भवंतं ऋते विना कतमः
प्रतीपयेत् प्रतिकूलमाचरेत् वैरी भवेद्भवतः यस्य लोके अतिशायनः अतिशयितो नास्ति तथा प्रियश्च अप्रियश्च नास्ति स

13A तस्यचप्रतिकूलकारणंद्वेधामहत्तमद्धोणसात्ताद्रोद्रेणचतत्रपुरुषाणांचातुर्विध्यंवदंतीमहत्तमद्धो
ह्रमाह दोषानितिद्वाभ्यां हेद्विजेत्यपिदेपः भवादृशास्त्वद्विधाः अमूयकाः परेषांगुणेषुदोषानेवगृ
षां ह्णंतिनतुगुणान्केचिन्मध्यस्थागुणेषुदोनगृह्णंति किंतु यथास्थितान् गुणदोषान्विवेकेनगृह्णंति
तेतुमद्धात उच्यंतेसाधवस्तुकेवलंगुणानेवगृह्णंतिनदोषान्तेतुमहत्तराउच्यंते महत्तमास्तुदोषान्न
गृह्णंतिप्रत्युतफल्गुत्वेनस्थितानपिगुणानेवबहुलीकरिष्णवोभवंति तेषुभवानन्यंअविदद्भिः दिनवान्क

दोषान्परेषांहिगुणेषुसाधवोगृह्णंतिकेचिन्नभवादृशाःद्विज गुणांश्चफल्गून्बहुलीकरिष्ण
वोमहत्तरास्तेष्वविदद्भवानःचम् १२ नाश्चर्यमेतद्यदसत्सुसर्वदामहद्विनिंदाकुणपात्मवा
दिषु सेर्ष्यमहापुरुषपादपांसुभिर्निरस्ततेजःसुतदेवशोभनं १३ मैं

ल्पितवानित्यर्थः तत्त्वगात्वत्त्विशानभिभूयकल्पितवानित्यनेनसूचितं १२ एतच्चदुर्जनेषुयुक्तमेवेत्याह
नेतिकुणपंजडंशरीरंतदेवात्मेतिवदंतियेतेषु ईर्ष्याअस्तीतिः सेर्ष्यंयथाभवत्येवंमहतांविनिंदतिय
देतदाश्चर्यंनभवति सेर्ष्यंनिरस्ततेजःप्रभावोयेषामितिवायद्यपिमहापुरुषाः स्वनिंदांसहंते तथापि
तत्पादरेणवस्तदसहमानास्तेषांतेजोसितिनिरस्यंति अतोशक्तेषुमहन्निंदनमेवोचितमित्यर्थः १३

14 (pencil)

श्री· भा·च· ·टी· १४

तदेवं महद्दोमुक्त्वा तस्मिन्नेव कृतद्रोहमाह यदिति द्वाभ्यां यद्यस्य द्व्यक्षरमात्रं शिव इति तत्त्वमसि हं नाम नृ
णां सर्वेषामाशु सर्वमघं हंति केवलं गिरेवेरितमुच्चारितं न तु मनःपूर्वकं तच्च सकृदपि प्रसंगादपि ते
शिवं हे शिन लेच्छ्यशासन माज्ञा यस्य अहो शिवेतरः अमंगलरूपः १४ पापहंतृत्वमुक्त्वा मुक्तिभुक्तिप्रदत्वे
न शिवं वर्णयत्याह यस्य पादपद्मे मनो सेवालयैर्ब्रह्मरसः ब्रह्मानंदः स एवासवो मकरंदस्तदर्थि·

यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् पवित्रकीर्तिं न मलंघ्यशासने
भवानहो हे शिशिवं शिवेतरः १४ यत्पादपद्मं सुहृतां मनोलिभिर्निषेवितं ब्रह्मरसासवार्थि
३ भिः लोकस्य यद्वर्षति चाशिषोर्थिनस्तस्मै भवान्द्रुह्यति विश्वबंधवे १५ किं वा शिवाख्यमशिवं न
विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये

भिः यच्चार्थिनः सकामस्य लोकस्य ताश्चाशिषो वर्षति १५ यदुक्तं शि \\ मूर्धभिर्दधति तच्चरणाव
वापदेशोस्य शिव इति यच्चोक्तं प्रेतावासेष्वित्यादि तदाक्षिपेत्याह किंवेति यो जटा अवकीर्य श्मशाने अव
सत् वसति स्म तस्य श्मशानस्य माल्यानि भस्मानि नृकपालानि च भूषणत्वेन संति यस्य सत्वोन्येन वि
दुः किं विदंन्ये वेति चेन्न तथा सति तेषां तदास्यानुपपत्तेरित्याह तच्चरणादवसृष्टं गलितं निर्माल्यं येन्

भुक्ती

पश्यमिर्गांचितेति ५

१४

14A

इदानीं देहंत्यक्ष्यंतीकामाधर्मंतत्त्वमाह कर्णौवाच्छाद्यनिर्गच्छेत् यद्यपिमंतुंमारयितुंवाकल्पोनभवति ।
करोधर्मरक्षकेईश्वरास्तामिति असृणिभिर्निरंकुशैः नृभिरस्यमानेअधिक्षिप्यमानेप्रभुःशक्तश्चेत्तुरुषती
मकल्याणवादिनीं असतस्वबलाच्छिंद्यात् ततोपिस्वयंप्राणान्विसृजेदितियत्सएवधर्मः १६ नचत्वत्तउत्प
न्नेषिशितिकंठोनीलकंठस्तन्निंदकारत् प्रमादादन्नस्यापवित्रस्यत्यागंविनानशुद्धिरितिदृष्टांतेनाह जग्धा ।

कर्णौपिधायनिरयाद्यदकल्पईशेधर्मावितर्यसृणिभिर्नृभिरस्यमाने छिंद्यात्प्रसह्यरुषतीमस
तीप्रभुश्चेज्जिह्वामसूनपिततोविसृजेत्सधर्मः १७ अतस्तवोत्पन्नमिदंकलेवरंनधारयिष्येशितिकंठग
र्हिणः जग्धस्यमोहाद्धिविशुद्धिमंधसोजुगुप्सितस्योद्धरणंप्रचक्षते १८ नवेदवादाननुवर्ततेमतिः
स्वएवलोकेरमतोमहामुनेः यथागतिर्देवमनुष्ययोःपृथक्स्वएवधर्मेनपरंक्षिपेत्स्थितः १९

सभवतितस्मादन्नस्योद्धरणंवमनमेवपुंसःशुद्धिंप्रचक्षते १८ यदुक्तंलमक्रियाशुचेरतित्यत्राहनेति वेदवादा
न्विधिनिषेधरूपान् स्वएवलोकेस्वात्मन्येवरममाणस्य महतोमुनेःसम्यग्विरक्तस्यमतिर्नानुवर्ततेनिवृ
त्ताधिकारत्वात् अधिकारभेदेदृष्टांतः तथादेवानांगतिराकाशेएवमनुष्याणांपृथिव्यामेव अतःस्वधर्मे
एव प्रवृत्तिलक्षणेनिवृत्तिलक्षणेवास्थितःसन् परमतंपरधर्मंप्ररूढंवानक्षिपेत्ननिंदेत् व्यवस्थिताधिकार

तेतोमनेःसम्भवात् नहिवेदेविधिनिषेधः

15 श्री॰ भा॰च॰ टी॰ १५

पतदेवोपपादयंत्याह प्रवृत्तमग्निहोत्रादि निवृत्तं शमदमादि ऋतंसत्यमेव यतः वेदे आश्रितं विहितं तच्च वि
विच्यतच्चव्यवस्थयाश्रितं तत्तद्विशेषेणाव्यवस्थयाश्रितं अवस्थामेवाह उभयेरागवैराग्यलक्षणं लिंगं चि
ह्नमधिकारिविशेषणं यस्मिंस्तत् ननुयावज्जीवमग्निहोत्रंजुहोति शांतोदांतइत्यादिश्रुतेनैवंव्यवस्थाप्रतीय
ते सत्यं तथाप्युभयोरेकाधिकारविरोधात् तथापर्यवस्यतीत्याह युगपज्ञावोयौगपद्यं यौगपद्येनैकस्मिन्
कर्तरितत्कर्मद्वयविरोधि ननुतर्हि निवृत्तेकर्मणिशिवेनापिकर्तव्यमेवेत्याह ब्रह्मणिसदाशिवे किंचिदपि

कर्मप्रवृत्तंचनिवृत्तमप्यृतंवेदेविविच्योभयलिंगमाश्रितं विरोधितद्यौगपदैककर्तरिद्वयंतथाब्रह्म
णिकर्मनर्च्छति: २० मावःपदव्यःपितरस्मदास्थितायायज्ञशालासुनधूमवर्त्मभिः तदन्नतृप्तैरसु
भृद्भिरीडिताअव्यक्तलिंगाअवधूतसेविता २१

कर्मनर्च्छतिनप्राप्नोति अतोयथाप्रवृत्तनिवृत्तयोःप
रस्परधर्माकरणेनदोषःतथैवात्रैतदुभयधर्माकरणेपीतिभावः २० चिताभस्मकृतस्नानस्तथानग्नइत्यादिना
योभोगाद्यभावउक्तस्तत्राह हेपितः अस्माभिरास्थिताः आश्रिताःपदव्यः अणिमादिसमृद्धयः वःयुष्माकंनसं
तीत्यर्थः यतोवः पदव्योयज्ञशालास्वेवभवंति ताश्चतदन्नेनयज्ञगतेनान्नेनतृप्तैः केवलमीडिताःस्मवर्त्मभि
श्चभुज्यंते याअस्मत्पदव्यस्तास्तुनैवंभूताः किंत्वव्यक्तलिंगाः अव्यक्तलिंगहेतुर्यासांइच्छामात्रप्रभवत्वात्

१५ अवधूतैः ब्रह्मविद्भिः सेवितास्मत्पदव्योऽहंदरिद्रइति गर्वमाकृथाइतिभावः २१

15A

किंबहुनोक्तेनेमंदेहंत्यक्ष्याम्येवेत्याहद्वाभ्यां एतेननालंनपर्याप्तंकिमपित्वलमेवकथंभूतेनकुजन्मनातदेवाह
हरेकृतापराधस्यतवदेहादुद्भूतेन उत्पन्नात्त्वत्तोयंदेहः कथंत्याज्यस्तत्राह कुजनस्यतवप्रसंगतः संबंधात् ममल
ज्जाभूद्यतः योमहतामप्रियकर्तातस्माद्यज्जन्मतद्धिक् स्वतत्त्ववंशादस्माच्च्यमित्यर्थः २२ किंचपरिहासादिष्वपि

नैतेनदेहेनहरेकृतागसोदेहोद्भवेनालमलंकुजन्मना व्रीडाममाभूत्कुजनप्रसंगतस्तज्जन्मधि
ग्योमहतामवद्यकृत् २२ गोत्रंत्वदीयंभगवान्वृषध्वजोदाक्षायणीत्याहयदासुदुर्मनाः व्यपेत
नर्मस्मितमाशुतद्ध्यहंव्युत्सृक्ष्यएततकुणपंत्वदंगजं २३ मैत्रेयउ० इत्यध्वरेदक्षमनूद्यशत्रुहन्क्षि
तावुदीचींनिषसादशांतवाक् स्पृष्ट्वाजलंपीतदुकूलसंवृतानिमील्यदृग्योगपथंसमाविशत् २४

गा२

नोद्वेनापिदाक्षायणीतिसंबोधयन् त्वदीयंत्वत्संबंधवाचकंगोत्रंनामयदावृषध्वजआह शृण्वातितदाहं
व्यपेतनर्मस्मितंयथाभवत्येवं सुदुर्मनाअतिदुःखितचित्ताभवामि तत्तस्मादिनिश्चितमेतत्कुणपंप्राये
णत्वत्तोत्यक्ष्यामि २३ इत्येवंप्रत्यनुवादंकृत्वाशत्रुहन् क्रोधादिरिपुघातिन् उदीचीमुदीच्यांदिशि शांत
वाकुदङ्मुखीशांतवाक्गृहीतमौना जलंस्पृष्ट्वाआचम्यइत्यर्थः २४

16
श्री॰
भा॰च॰
टी॰ स्क॰
१९

योगमार्गमेवाह कृत्वेति अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिकौ निरोधेन समानौ एकरूपौ नाभिचक्रे कृत्वा ततउ
दानमुत्थाप्य धिया सह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् २५ महतां पूज्यतमेन २६ चरणांबुजे॰
आसवं भजनानंदं भर्तुरपरं न ददर्श देहश्च सद्यः प्रज्वलितोभूत् समाधिना जातोयोग्निस्तेन २७ खेभुविचहा

कृत्वा समानावनिलौ जितासनो सोदानमुत्थाप्य च नाभिचक्रतः शनैर्हृदिस्थाप्य धियोरसिस्थितं कंठाद्भ्रुवो
र्मध्यमनिंदितानयत् २५ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् जिहासती दक्षरु
षा मनस्विनी दधार गात्रेष्वनिलाग्निधारणां ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरं द
दर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना २७ तत्पश्यतां खे भुवि चाद्भुतं महद्धा हेति
वादः सुमहानजायत हंत प्रिया दैवतमस्य देवी जहावसून्केन सती प्रकोपिता २८ अहो अनात्म्यं मह
दस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः जहावसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हती
सोयं दुर्मर्षहृदयो ब्रह्मध्रुक्च लोकेपकीर्तिं महतीमवाप्स्यति यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेध न्मृतयेपराधतः ३०

हेत्यादि वादः तमेवाह हंतेति त्रिभिः दैवतमस्य श्रेष्ठतमस्य प्रिया केन दक्षेण प्रकोपिता सती २८ महदनात्म्यं दौ
र्जन्यं अस्य सर्वं चैव पचन्यायदृस्याद्ः तस्येति येन विमताश्रवज्ञाता २९ दुर्मर्षमसह्यं हृदयं यस्य लोके ज
नमध्ये च शास्त्रान्तरेके च यतः स्त्रीयामंगजां सतीमपराधतः स्वावज्ञया मृतये मरणायोद्यतां न निवारितवा

१९

16A

अद्भुतंरद्द्वाच ३१ यत्तंद्दंतीतियत्तत्वंसत्त्वांद्दंतीतियज्ञंज्ञंज्ञतेनअपह्रतंरत्तद्द्द्यादिना ३२ अथर्वणाभृगुणाभृ
गुणायेनतपसासोमंप्रामाः ऋभवोनामदेवाउत्थिताः ३३ ब्रह्मतेजसोभिर्देदीप्यमानैः ३४ इतिचतुर्थेचतुर्थः ५

पंचमेतमसतैरैहत्यागमाकर्ण्यशंकरः वीरभद्रंरुषोत्पाद्यतेनदक्षमघातयत् १ प्रजापतेर्दुहितुःनिधनं ऊतसे
मैत्रेयउ॰ वदस्वैवंजनेसत्याद्द्वासत्याग[त्या]मद्भुतं दक्षंतत्पार्षदाहंतमदतिष्टन्नुदायुधैः ३१ तेषामाय
ततांवेगंनिशम्यभगवान्भृगुः यज्ञघ्नघ्नेनयजुषादक्षिणाग्नौजुहावह ३२ अथर्वणाहूयमानेदे
वाउत्पेतुरोजसा ऋभवोनामतपसासोमंप्रामासहस्रशः ३३ तैरलातायुधैःसर्वेप्रमथाससहगुह्यकाः
हन्यमानादिशोभेजुरुशद्भिर्ब्रह्मतेजसा ३४ इतिचतुर्थेचतुर्थः ४ मैत्रेयउ॰ भवोभवान्यानिधनं
प्रजापतेरसत्कृतायाअवगम्यनारदात् स्वपार्षदसैन्यंचतदध्वरर्भुविर्विद्रावितंक्रोधमपारमादधे १ क्रु
द्धःसुदष्टोष्टपुटःसधूर्जटिर्जटांतडिद्वह्निसटोग्ररोचिषं उत्कृत्यरुद्रःसहसोत्थितोहसन्गंभीरनादोवि
ससर्जतांभुवि २ ततोतिकायस्तनुवास्पृशन्दिवंसहस्रबाहुर्घनरुक्त्रिसूर्यदृक् करालदंष्ट्रोज्वलदग्नि

॥नासत्कृतायाःतस्याधरेयंऋभवोदेवास्तैः १ सधूर्जटिःरुद्रःचोरःसन् जटाग्रत् क्रुद्धोत्पादितोत्थितःसन् तांभुविस
सर्ज स्वदष्टओष्टपुटोयेन तडितांवह्नीनांचसटाज्वालास्तद्वत् उग्ररोचिर्यस्यासौ २ ततोजटायाःसकाशात् स्व

17

श्री॰ भा॰ च॰ १२

तिकायोवीरभद्रोनामइतिशेषः तनुवातन्वादेहेनदिवंस्पृशन् अभ्रस्वच्छस्पर्शः घनरूप हासवर्णः त्रयःसूर्याइ
वदह्योनेत्राणियस्य करालास्तिग्मादंष्ट्रायस्य ज्वलदग्निरिवमूर्धजायस्य कपालमालायुक्तः विविधान्युद्य।
नान्यायुधानियस्य ३ हेरुद्र हेभटकुलकुशल मद्भटानांतमग्रणीः सन् सयज्ञंदक्षंजहि व्रजतेजोऽहंजय

तंकिंकरोमीतिगृणंतमाहवद्धांजलिंभगवान्भूतनाथः दक्षंसयज्ञंजहिमद्भटानांत्वमग्रणीरु
द्रभटांशकोमे ४ आज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेविभुं मेनेतदात्मानमसंग
रंहसामहीयसांतातसहःसहिष्णुम् ५ अन्वीयमानःसतुरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैर
वं उद्यम्यशूलंजगदंतकांतकं सप्राद्रवद्घोषणभूषणांघ्रिः ६ अथर्त्विजोयजमानःसद
स्याःककुभ्युदीच्यांप्रसमीक्ष्यरेणुं तमःकिमेतत्कुतएतद्रजोभूदितिद्विजाद्विजपत्न्यश्चद
ध्युः ७

मितिमामंस्थाः यतस्त्वंमेअंशकः ४ मन्युनारुद्रेणपरिचक्रेप्रदक्षिणीचकार असंगमप्र
तिघातंयत् रंहोवेगस्तेन मोतातमहीयसांबलीयसामपिसहः सहिष्णुंबलेसोऽहमितिमेने ५ जगदंत
कोमृत्युस्तस्याप्यंतकंशूलं घोषयंतिशब्दंकुर्वंतीतिघोषणानिनूपुरादीनिभूषणानियोरंघ्रयोस्तौअंघ्रीयस्य
सः ६ ककुभिदिशितमोनभवति किंतुरजइतिज्ञात्वाऊचुः रजएतत्कुतोभूत् दध्युश्चिंतयामासुः ७ १२

17A हेतं तदभावे नोत्पातिकं कल्पयंति वाताइति दक्षनामभावे हेतुः प्राचीनबर्हिस्तदानीं तनो राजा जीवति न
कल्पते शीघ्रं नीयंते ८ प्रसूतिर्दक्षपत्नी सा मिश्रा अश्रुख्यायासां विपाकः फलं पश्यंतीति नामिति तस्माद्दुःखा
रिको हेतुः अवदधावव ज्ञातवान् अनागामनागसां ९ नवेदं स्वनावज्ञामात्रं किंतु रुद्रावज्ञानमतो नास्मभ

मू वाता न वांति दिहि संति दक्षवः प्राचीनबर्हिर्जीवति होयदं उः गांवो न काल्यंत इदं कुतो रजो लोको
पुनाकिं प्रलयाय कल्पते ८ प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता उ दुर्विपाको वृजिनस्यैव तस्य यत्
पश्यंतीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागां ९ यस्त्वंतकाले व्युप्तजटाकलापः स्वशूलसू
च्यर्पितदिग्गजेंद्रः वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् १० अमर्षयित्वा
तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो वि

धं भविष्यतीत्याहुः यस्त्विति द्वाभ्यां व्युप्तो विकीर्णो जटाकलापो यस्य स्वशूलस्याग्रे अर्पिताः प्रोता दिग्गजेंद्रा
यस्य उदितान्युन्नमितान्यस्त्राणि येस्ते दोषो वाहव एव ध्वजास्तैः वितत्य सहर्षेण नृत्यति उच्चैर्हासः कठोरो हा
स एव स्तनयित्नुगर्जितं तेन भिन्ना विदीर्णा दिशो येन सः १० अमर्षयित्वा असहनमुत्कं कृत्वा मन्युप्लुतं
कोपव्याप्तं उदस्ता उत्क्षिप्ता भागणा नक्षत्रसंचया येन पुनश्च तं कोपयतो विधातुरपि किं स्वस्ति स्यात्तस्मादेव

18

उद्विग्ना प्रवलिता दृश्यमानेन जनेन बहु यथा भवत्येव मुच्यमाने सति उत्पाततमाः महोत्पाताः उत्थिताः प
र्यक् सर्वतः स्वकर्थभूता महात्मनोपि दक्षस्य भयावहाः १२ नानाआयुधानि येषां वामनकैः ह्रस्वैः उद्य
तायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोदरमाननं च येषां तैः परितो धावद्भिः अवरुद्धः १३ यज्ञशा

मैत्रेय उ० बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मुहुर्महात्मनः उत्पेतुरुत्पाततमाः सहस्रशो
भयावहा दिवि भूमौ च पर्यक् १२ तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः पिं
गैः पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत १३ केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथा
परे सद आग्नीध्रशालां च तद्विहारं महानसं रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् कुंडेष्वमूत्र
यन्केचिद्बिभिदुर्वेदिमेखलाः १५ अबाधंत मुनीनन्य एके पत्नीरतर्जयन् अपरे जगृहुर्देवान्प्रत्यास
न्नान्पलायितान् १६ भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिं चंडीशः पूषणं देवं भगं नंदीश्वरोऽग्रही

लायाः पूर्वपश्चिमस्तंभयोः अर्पितं पूर्वपश्चिमायतं काष्ठं प्राग्वंशस्तं यज्ञशालायाः पश्चिमतः पत्नीशालां यज्ञ
शालायाः उत्तरतः स्थितं सदो मंडपं सदसः उत्तरतो हविर्धानं तस्योत्तरत आग्नीध्रशालां तद्विहारं यजमानगृहं
महानसं पाकभोजनशालां १४ रुरुजुः बभंजुः उत्तरवेद्या मेखलाः सीमासूत्राणि १५ १६ १७

श्री० भा० च० टी० १८

१८

18A ग्रावभिरर्द्यमानाः नैकधाश्चनैर्धाउड्डवुः १८ स्रुवोहस्तेयस्य भवोवीरभद्रः ललुंचेउत्पाटितवान्
१९ उज्जहारउद्धृतवान्सदःस्थः सभायामुत्थितः सन् शपंतंशिवनिंदांकुर्वंतंदक्षं श्मश्रुणिकोपेनाहृ
चदत् प्रेरितवान् २० कलिंगदेशराजस्यानिरुद्धोद्वाहेवल्लभद्रोयथाहृतेदंतान्पातितवान् गरिमणिरु
रुतरेरुद्रेनिर्घमाने दत्तः दंतान्दर्शयन् योजहास पूष्णोरितिपाठेद्विवचनं पैष्णापोसश्चरुर्भवतियत्र

सर्वपर्वत्विजोदृष्ट्वासदस्याः सदिवौकसः तैरर्द्यमानाः सुभृशंग्रावभिर्नैकधाद्रवन् १८ जुहृ
वा तः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः भृगोर्लुलुंचे सदसियोहसच्छ्मश्रुदर्शयन् १९ भगस्यने ह
त्रेभगवान्पातितस्यरुषाभुवि उज्जहारसदःस्थोत्ताणायःशपंतमहृद्रुदत् २० पूष्णस्त्वापातय
द्दंतान्कालिंगस्ययथाबलः शप्यमानेगरिमणियोहसद्दर्शयन्दतः २१

तत्सहितस्यापिपूष्णोदंतपातप्राप्त्यर्थः सूचितवान् तथाहिपूषाप्रपिष्टभागोःदंतकोहितंदेवानितिवि
हितस्यपोषणस्यद्विदैवत्याभावात् तत्रतस्यदत्तः सन्नीतिवक्तव्यस्मात् नचैतत्संगच्छतइत्याशंक्य तत्राप्य
स्यदंतपातोवस्यामेदे प्रवृत्तेनद्विवचनेनत्ताप्यते अतएवपूष्णोनुग्रहंद्वेधावक्ष्यति पूषातुयजमानस्य दद्भि
र्भक्षितपिष्टभुक् इतिकेवलस्यैतमपिष्टभुग्भविष्यतिअन्यसहितस्यैव यजमानस्यदद्भिर्भक्षयिष्यतीत्यर्थः २१

19

श्री॰ भा॰ च॰ टी॰ १९

छिंदन्नपीत्यत्रशिरस्तुपरिव्यक्तीभविष्यति अयंवकोवीरभद्रः २२ अस्त्रान्वितैर्मंत्रसहितै ननिर्भिन्नात्वक्
यस्यतथाभूतंदृष्ट्वेतिशेषः २३ सपशूनांपतिःमखेसंज्ञपनेयोगंकंठनिष्पीडनादिरूपंमारणोपायंदृष्ट्वा ते
नोपायेनाहरत २४ अन्येषांब्राह्मणादीनांतद्विपर्ययः असाधुवादःअभूदितिशेषः २५ गुह्यकालयंकै॰

आक्रम्योरसिदक्षस्यशितधारेणहेतिना छिंदन्नपितदुत्तमांगंनाशक्नोत्त्र्यंबकस्तदा २२ शस्त्रैरस्त्रा
न्वितैरेवमनिर्भिन्नत्वचंहरः विस्मयंपरमापन्नोदध्यौपशुपतिश्चिरं २३ दृष्ट्वासंज्ञपनंयोगंपशूनां
सपतिर्मखे यजमानपशोःकस्यकायात्तेनाहरच्छिरः साधुवादस्तदातेषांकर्मतत्स्यशंसतां भूत
प्रेतपिशाचानामन्येषांतद्विपर्ययः २५ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः तद्देवयजनं
दग्ध्वाप्रातिष्ठद्गुह्यकालयं २६ इतिचतुर्थेपंचमः ५ मैत्रेयः अथदेवगणाःसर्वेरुद्रानीकैःप
राजिताः शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः १ संछिन्नभिन्नसर्वांगाःसर्त्विक्सभ्याभयाकु
लाः स्वयंभुवेनमस्कृत्यकार्त्स्न्येनतन्न्यवेदयन् २

लायं २६ इतिचतुर्थेपंचमः ५ षष्ठेतुदेवसंघेनस
हगत्वाभवंविधिः सांत्वयामासदक्षादिजीविताद्यर्थमादरात् १ अथदेवगणाःस्वयंभुवेन्यवेदयन्निति
द्वितीयेनान्वयः १ शूलादिभिःसंछिन्नानित्रुटितानिभिन्नानिविदीर्णानिअंगानियेषांसहर्त्विग्भिःसभ्यै

१९

197 कस्मदत्तस्यनेयतुः नजग्मतुः ३ विभुर्ब्रह्मातेजीयसिअतितेजस्विनिपुरुषेकृतागसिसत्यपिस्वयंत
त्रकृतागसां बुभूषतामपराधंकर्तुमिछतां स्यातथाबुभूषानेषांक्षेमायनभूयात् प्रायेतिकोक्तिः नभवेदि
त्यर्थः ४ तथापिप्रसादयध्वंक्षमापयतयेभवंतः बर्हिषोयज्ञस्यभागभाजंपराडुः हरादेवरवंडितवंतः प्रगृ

उपलभ्यपुरैवैतद्भगवानब्जसंभवः नारायणश्चविश्वात्मानकस्याध्वरमीयतुः ३ तदाकर्ण्यवि
भुःप्राहतेजीयसिकृतागसि क्षेमायतत्रसाभूयान्नप्रायेणबुभूषतां ४ अथापियूयंकृतकि
ल्बिषाभवंयेबर्हिषोभागभाजंपराडुः प्रसादयध्वंपरिशुद्धचेतसाक्षिप्रप्रसादंप्रगृहीतांघ्रिपद्मं ५
आशासानाजीवितमध्वरस्यलोकःपालःकुपितेनयस्मिन् तमाशुदेवंप्रिययाविहीनंक्षमापय
ध्वंहृदिविद्धंदुरुक्तैः ६ नाहंनयज्ञोनचयूयमन्येदेहभाजोमुनयश्चतत्वं विदुःप्रमाणंबलवी ये।

हीतांघ्रिपद्मंपादौप्रगृह्यस्थेत्यर्थः ५ अध्वरस्यजीवितंपुनः ॥ र्ययोर्वायस्यात्मतंत्रस्यकउपायंविधित्सेत ७ स्य।
संधानंप्रार्थयमानाःसंतः यस्मिन् कुपितेसतिनभवेत् नश्येदित्यर्थः ६ वयंतत्रगंतुंविधिमुत्स्वमे।
वकंविदुपायंविधत्स्वेतिचेदतआह नेति यज्ञस्तदानीतनइन्द्रः यस्यतत्वंबलवीर्ययोःप्रमाणमियत्तां
विदुः वीर्यंपराक्रमः पापमितिपाठेअपराधम् ७

४०

श्री॰ ८ कैलासं वर्णयति जन्मौषधीत्यादिचतुर्दशभिः नरेतरैर्देवैः जुष्टं ९ शृंगैरमणीं रतिप्रदमित्यन्वयः क

पिभूतैः नानाधातुभिः विचित्रितैः नानाद्रुमलतागुल्मा येषु १० नानामलानि प्रस्रवणानि येषु नानाकंदराः

भा॰च॰ सानवः शृंगाणि येषु रमणैः सह क्रीडंतीनां ११ मयूराणां केकाभिः स्वनैः नादितं मदांधैरलिभिर्विमूर्छितं मूर्छ

टी॰

२॰ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैला

समद्रिप्रवरं प्रियं प्रभोः ८ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं

सदा ९ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः १० ना

नामलप्रस्रवणैर्नानाकंदरसानुभिः रमणं विहरंतीनां रमणैः सिद्धयोषितां ११ मयूरकेकाभिरुतं

मदांधालिविमूर्छितं प्लावितै रक्तकंठानां कूजितैश्च पतत्रिणां १२ आह्वयंतमिवोद्धस्तैर्द्विजान्का

\\ मदुघैर्द्रुमैः व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः १३

नारागातिविशेषस्ताह्यातं कूजितं रक्तकंठा

नां कोकिलानां प्लावितैः प्लुतैर्नीतैः स्वरैः अन्येषां पतत्रिणां च कूजितैः १२ उद्धस्तैरुन्नतशाखैर्द्रुमैः द्विजा

न्पक्षिणः आह्वयंतमिव लोके हि हस्तमुत्क्षिप्योच्चैः स्वरेणाह्वानमर्थिनां कुर्वंति अद्रिश्चोक्तमहस्ताकारैर्द्रु २॰

मैस्तत्रत्यपतत्रिस्वनैस्तथा तिष्ठतीत्यर्थः व्रजद्भिर्मातंगैर्व्रजंतमिव निर्झरध्वनिभिर्गृणंतं भाषमाणमिव १३

४०A १४ वृत्ताम्रयोरवांतरजातिभेदः वेणुकवचकयोश्चनीरंध्रसरंध्रत्वेन भेदः १५ वेणुकदाजातिभिरित्यत्रवे
णुकाप्लाजातिर्मालती १६ १७ द्रुमजातिभिरित्यत्रजातिरवांतरभेदसामान्यं १८ उत्पलादिसमृद्धिभिर्हेतु
भिःनलिनीषुसरःसुकलेमधुरंयथाभवत्येवंकूजंतियानिपत्त्रिद्वंद्वानितैरुपशोभितं १९ मृगादिभिर्जुष्टंनिषे ह

मंदारैःपारिजातैश्चसरलैश्चोपशोभितं तमालैःसालतालैश्चकोविदारासनार्जुनैः १४ वृत्तैःकदंब
नीपैश्चनागपुन्नागचंपकैः पाटलाशोककवकुलैःकुंदैःकुरवकैरपि स्वर्णार्णशतपत्रैश्चवेणुवेणु ए
कजातिभिः कुब्जकैर्मल्लिकाभिश्चमाधवीभिश्चमंडितं १६ पनसोडुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः
भूर्जैरोषधिभिःपूगैराजपूगैश्चजंबुभिः १७ खर्जूराम्रातकाम्राद्यैःप्रियालमधुकेंगुदैः द्रुमजातिभि
रन्यैश्चराजितंवेणुकीचकैः १८ उत्पलोत्पलकल्हारशतपत्रवनर्द्धिभिः नलिनीषुकलंकूजत्खग
द्वंद्वोपशोभितं मृगैःशाखामृगैःक्रोडैर्मृगेंद्रैरृक्षशल्यकैः गवयैर्नाभिभिर्व्याघ्रैर्निर्जुष्टंमहिषा
दिभिः २० कदलीखंडसंरुद्धनलिनीपुलिनश्रियं पर्यस्तंनंदयासत्याःस्नानपुण्यतरोदया २१

वितं नाभिभिःकस्तूरीमृगैःशर्वशृगरालाःशृंगविशेषणत्वेनोक्ताः इदानींस्थानंत्रेणोत्पपोनहुक्तं २० कदलीखं
डैःसंरुद्धान्यावृतानिनलिनीनांपुलिनानितैःश्रीःशोभायस्मिन्नंदयागंगयापर्यस्तंपरिवेष्टितं सत्याःभवा॥

21

श्री· भा·च· टी· २१

तत्रगिरौवनेंचददृशुर्यत्रवने तन्नामसौगंधिकंनामपंकजंभवतिजातावेकवचनं २२ पुरींवर्णयति न
न्दाचेतिचतसृभिः सरितौपुराद्बाह्यतोभवतां तीर्थपादस्यहरेः पादांभोजरजसा २३ ययोर्विगाह्यप्रविश्यक्रीडं
ति २४ ययोरंभोविगततृषोपिगजाःपिबंति तत्रहेतुः तासांसुरस्त्रीणांस्नानेनभ्रष्टंगलितंयन्नवंकुंमेते कुं

विलोक्यभूतेशगिरिंविबुधाविस्मयंययुः ददृशुस्तत्रतेरम्यामलकांनामवैपुरीं २२ वनंसौगं
धिकंचापियत्रतन्नामपंकजं २२ नंदाचालकनंदाचसरितौबाह्यतःपुरां तीर्थपादपदांभोजर त्र
जसातीवपावने २३ ययोःसुरस्त्रियःक्षत्तरवरुह्यस्वधिष्ण्यतः क्रीडंतिपुंसःसिंचंत्योविगाह्यरति
कर्षिताः २४ ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं वितृषोपिपिबंत्यंभःपाययंतिगजागजीः
२५ तारहेममहारत्नविमानशतसंकुलां जुष्टांपुण्यजनस्त्रीभिर्यथाखंसतडिद्घनं २६ हित्वा
यक्षेश्वरपुरींवनंसौगंधिकंचतत् द्रुमैःकामदुघैर्हृद्यंचित्रमाल्यफलच्छदैः २७ त्र

नपिंजरंपीतवर्णांगजीःकरिणीः २५ तारंरूप्यं तारादिमयविमानानांशतैःसंकुलांतडिद्भिःस्त्रीभिःखेवै
विमानानांखेनपुर्यःसादृश्यं २६ यक्षेश्वरपुरींहित्वाऽतिक्रम्य तद्वनेंचददृशुरितेदेवाःआराद्दूराद्ददृ
शुरितिचतसृभिरेकेनान्वयः कथंभूतेवने चित्राणिमाल्यानिफलानिच्छदाश्चयेषुतैर्द्रुमैःहृद्यंसुखकरं २७ २१

३।७

रक्तकंठखगानामनीकस्यस्वरैर्मंडिताः षट्पदाः षट्पदस्वरायस्मिन् कलहंसानांकुलस्यप्रेष्ठं खरदंडातिप
त्रानितैर्युक्ताजलाशयायस्मिन् २८ वनकुंजरैः संघृष्टायेहरिचंदनद्रुमास्तत्संबंधिनावायुना पुण्यजनस्त्रीणां
मनः अपिअधिकमुन्मथयत् २९ यत्रचोत्पलमालिन्योवाप्यस्तत्रकिंपुरुषैः प्राप्तवापीश्चदृष्ट्वेत्यर्थः ३ योजन

रक्तकंठखगानीकस्वरमंडितषट्पदं कलहंसकुलप्रेष्ठंखरदंडजलाशयं २८ वनकुंजरसंघृष्ट
हरिचंदनवायुना अधिपुण्यजनस्त्रीणांमुहुरुन्मथयन्मनः २९ वैडूर्यकृतसोपानावाप्यउत्पलमा
लिनीः प्राप्तंकिंपुरुषैर्दृष्ट्वातआराद्ददृशुर्वटं ३० सयोजनशतोत्सेधः पादोनविटपायतः पर्यक्कृता
चलच्छायोनिर्नीडस्तापवर्जितः ३१ तस्मिन्महायोगमयेमुमुक्षुशरणेसुराः ददृशुःशिवमासीनं
त्यक्तामर्षमिवांतकं ३२ सनंदनाद्यैर्महासिद्धैःशांतैःसंशांतविग्रहं उपास्यमानंसख्याचभर्त्रागुह्य
करक्षसां ३३ विद्यातपोयोगपथमास्थितंतमधीश्वरं चरंतंविश्वसुहृदंवात्सल्याल्लोकमंगलं ३४

शतमुत्सेधउच्छ्रायोयस्यपादोनैःसर्वतःपंचसप्ततियोजनप्रमाणैर्विटपैःशाखाभिरायतोविस्तृतःपर्यक्कृ
सर्वतःकृताअचलच्छायायेननिर्गतंनीडंयस्मात् ३१ मुमुक्षूणांशरणे आश्रयेत्यक्तामर्षांतकंस्तितं ३२
तेविशिनष्टि सनंदनाद्यैरितिपंचभिःसख्याचकुवेरेणोपास्यमानं ३३ विद्याउपासनाः तपस्विनेकाग्र्ययोगः

समाधिः तेषां पंथानं प्रवर्तनं हाणं लोकस्य क्षेमं लोहितं तत्कोवात्सल्य
लोकहिताय वांछन् ३४

22

श्री॰ भा॰ च॰ टी॰ २२

संध्याभ्रत्वा रक्तवर्णेनांगेन भस्मादिलिंगं चंद्रलेखां च बिभ्रतं ३५ व्रतिनामासनं हृसीतयां ब्रह्मप्रवोचंतं ३६ स
व्यपादपद्मं दक्षिणांघ्रौ कृत्वा विन्यस्य जानुनि च सव्ये बाहुं कृत्वा दक्षिणबाहुप्रकोष्टे मणिबंधस्थाने रुद्रमालां
कृत्वा दक्षिणहस्तकृतया तर्कमुद्रया तपलक्षितमासीनमित्यर्थः तदुक्तं योगशास्त्रे एकेपादमथैकस्मिन्वि

लिंगं च तापसाभीष्टं भस्मदंडजटाजिनं अंगेन संध्याभ्ररुचा चंद्रलेखां च बिभ्रतं ३५ उपविष्टं दर्भमय्यां
वृस्यां ब्रह्म सनातनं नारदाय प्रवोचंतं पृच्छते शृण्वतां सतां ३६ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च
जानुनि बाहुं प्रकोष्ठेक्षमालामासीनं तर्कमुद्रया ३७ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गि
रिशं योगकक्षां सलोकपाला मुनयो मनूनामाद्यं मनुं प्रांजलयः प्रणेमुः ३८ स तूपलभ्यागत
मात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिः उत्थाय चक्रे शिरसाभिवंदनमर्हत्तमः कस्य यथैव वि

न्यस्य हस्तसंस्थितं इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतं तर्कमुद्रा चोक्ता तर्जन्यंगु॥ ष्णुः ३९
ष्ठयोरग्रे मिथः संयोज्य चांगुलीः प्रसार्य बंधनं प्राहुस्तर्कमुद्रेति मोक्षिका इति ३७ ब्रह्मनिर्वाणं ब्रह्मानं
दस्तत्र समाधिरेकाग्र्यं तमाश्रितं योगकक्षां योगपट्टं च वामजानुदृढीकरणार्थं विशेषेणोपाश्रित
वंतं मननशीलाः मनवस्तेषामाद्यं मनुं ३८ अर्हत्तमो विस्सर्वो मनमूर्तिर्यथा कस्य कश्यपस्य ३९ २२

२२७ महर्षिभिः सहितायेनीललोहितमनुवर्त्तनेपितस्मैवेदनंचक्रुः एवंसर्वैर्नमस्कृतःप्राह कृतःप्रणामोदेवै
व्यऊचुः अहोइयंवधूर्धन्यायाचैवंभूभुजांपतिं सर्वात्मनापतिंभेजेयज्ञेशंश्रीर्वधूरिव २५ सैषानू
नंव्रजत्यूर्ध्वमनुवैन्यंपतिंसती पश्यतास्माननतीत्यार्चिःदुर्विभाव्येनकर्मणा २६ तेषांदुरापंकिंत्वन्यन्म
र्त्यानांभगवत्पदं भुविलोलायुषोयेवैनैष्कर्म्यंसाधयन्त्युत २७ सवंचितोबतात्मध्रुक्कृच्छ्रेणमह
ताभुवि लब्ध्वापवर्ग्यंमानुष्यंविषयेषुविषज्जते २८ मैत्रेयउ० स्तुवतीष्वमरस्त्रीषुपतिलोकंगतावधूः
यंवाआत्मविदांधुर्योवैन्यःप्रापाच्युताश्रयः २९ इत्थंभूतानुभावोसौपृथुःसभगवत्तमः कीर्तितंतस्य
चरितमुद्दामचरितस्यते ३०

श्री

तितयातेनैष्कर्म्यंज्ञानंयेचंचलायुषोपिसाधयन्ति तेषामन्यद्देवादिपदंकिंदुर्लभंनकिंचिदित्यर्थः २७ अभा
ग्यंशोचतिसवंचितइतियतआत्मानंद्रुह्यतियोपवर्गसाधनंमानुष्यंलब्ध्वापिविषयेषुआसक्तिंयाति २८ २९ ३०

श्री॰ ३१ विशांपस्यादीनांवैश्यादीनांवापतिःस्यात् ३२ ३९ यद्यपिबहूनिफलानिभवंतितथापिमुक्तान्यसंगापव
भा॰च॰ श्रवणादिकुर्यात् ३० महतोभगवतोमाहात्म्यसूचकंपार्थिवीपृथुसंबंधिनीपार्थवीमितिवापाठः ३१ प्र
टी॰
८५
85

य इदंसुमहत्पुण्यंश्रद्धयावहितःपठेत् श्रावयेच्छृणुयाद्वापिसपृथोःपदवीमियात् ३१ ब्राह्मणो
ब्रह्मवर्चस्वीराजन्योजगतीपतिः वैश्यःपठन्विट्पतिःस्याच्छूद्रःसत्तमतामियात् ३२ त्रिःकृत्वइद
माकर्ण्यनरोनार्यथवादृतः अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः अस्पष्टकीर्तिःसुयशामूर्खो
भवतिपंडितः ३३ इदंस्वस्त्ययनंपुंसाममंगल्यनिवारणं धन्यंयशस्यमायुष्यंस्वर्ग्यंकलिमलापहं ३४
धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः श्रद्धयैतदनुश्राव्यंचतुर्णांकारणंपरं ३५ विजया
भिमुखोराजाश्रुत्वैतदभियातियान् बलिंतस्मैहरंत्यग्रेराजानःपृथवेयथा ३६ मुक्तान्यसंगोभ
गवत्यमलांभक्तिमुद्वहन् वैन्यस्यचरितंपुण्यंशृणुयाच्छ्रावयेत्पठेत् ३७ वैचित्रवीर्याभिहितंमह
न्माहात्म्यसूचकं अस्मिन्कृतमतिमर्त्यःपार्थिवींगतिमाप्नुयात् अनुदिनमिदमादरेणशृण्वन्पृ
थुचरितंप्रथयन्विमुक्तसंगः भगवतिभवसिंधुपोतपादेसचनिपुणांलभतेगतिंमनुष्यः ४०
इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेवैकुंठगमनंत्रयोविंशः २३ ८५
यथान् भवसिंधौपोतःपादौयस्य ४० इतिश्रीभावार्थेचतुर्थस्कंधेवैकुंठगमनंनामत्रयोविंशोध्यायः २३

त्रस्य

85A एकादशभिरध्यायैः पृथोश्चरितमीरितं प्रचेतसामथाष्टाभिर्जन्मध्येपंचभिः पितुः चतुर्विंशे प्रपौत्राणां पृ
थोः प्राचीनवर्हिषः प्रचेतसां जनिस्तेभ्यो रुद्रगीतं च वर्ण्यते अधिराजा आसीदित्यर्थः १ यवीयेभ्यो कनिष्ठेभ्यः
काष्ठा दिशः तुर्यां चतुर्थी २ शक्रात्लब्ध्वा पृथोरश्वमेधेः स्वविजयावसरे ३ अपत्यत्रयमेवाह पावकः

मैत्रेय उवाच विजिताश्वोधिराजासीत्पृथुपुत्रः पृथुश्रवाः तस्मै वलिं हरंति स्म राजानः पृथवेय
था १ यवीयेभ्योददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणां प्र
तीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः २ अंतर्धानगतिं शक्राल्लब्ध्वांतर्धानसंज्ञितः अपत्यत्रयमाधत्त
शिखंडिन्यां सुसंमतं ३ पावकः पवमानश्च शुचिरित्यग्नयः पुरा वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं
गता ४ अंतर्धानो नभस्वत्यां हविर्धानमविंदत य इंद्रमश्वहर्तारं विद्वानपि न जघ्निवान् ५ राज्ञां वृ
त्तिं करादानदंडशुल्कादिदारुणां मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ६

त्रिपुरायः शापः तस्मान्मनुष्येषूत्पन्नाः संतः योगगतिमग्नित्वं प्राप्ताः ४ नभस्वत्यामन्यस्यां भार्यायामंतर्धान
विशेषणं य इति एतेन शक्रादंतर्धानगतिलाभे कारणमुक्तं ५ स चान्तर्धानः राज्ञां वृत्तिं करादानादिभिर्दा
रुणां परपीडात्मिकां मन्यमानो विससर्ज ६

श्री॰ भा॰ च॰ टी॰ ८९ 86

हंतिस्वानांक्लेशमितिदमः तंपूरुषंपूर्णांकुशलेपुण्यंपतद्रूपेणसमाधिना ७ हाविर्धानिःहविर्धानस्यपुत्रः
८ योगेषुचप्राणायामादिषु ९ क्रियकांडनिष्णातत्वमाह यस्येति ३ इदंवसुधातलंदेवयजनंयज्ञवाटंवि
तन्वतः यत्रैकोयज्ञः कृततत्समीपएवयज्ञांतरंकुर्वतः सतः अतएवप्राचीनबर्हिरित्युच्यते ४ समुद्रस्य
कन्यांदेवदेवेनब्रह्मणोपदिष्टांशतद्रुतिनाम किशोरीबालां परिक्रमंतींप्रदक्षिणंगच्छंतीं शुकीमिवे

तत्रापिदंसंपुरुषंपरमात्मानमात्मदृक् यज्ञंस्सलोकतामापकुशलेनसमाधिना ७ हविर्धाना
हविर्धानिर्विदुरासूतषट्सुतान् बर्हिषदंगयंशुक्लंकृष्णंसत्यंजितव्रतं ८ बर्हिषत्सुमहाभागोहा
विर्धानिःप्रजापतिः क्रियाकांडेषुनिष्णातोयोगेषुचकुरूद्वह ९ यस्येदंदेवयजनमनुयज्ञंवितन्व
तः प्राचीनाग्रैःकुशैरासीदास्तृतंवसुधातलं १० सामुद्रीदेवदेवोक्तामुपयेमेशतद्रुतिं यांवीक्ष्य
चारुसर्वांगींकिशोरींसुष्ठ्वलंकृतां परिक्रमंतीमुद्वाहेचकमेग्निःशुकीमिव ११

ति एवंव्याख्यायते सप्तर्षीणांमध्येतद्भार्यादर्शनेनाग्निकामसंतप्तोभूत्एवंचतद्भार्यास्वाहानामसप्तर्षिभा
र्यारूपधारिणीसतीरमयामास रमयित्वाचतद्रेतः शुकीरूपेणशरस्तंबेनिधायागच्छत्तायथासप्तर्षिभा ८९
र्यांभ्रांत्याग्निःकामितवान् तद्वदिति शुकीमिवेतिपाठेसुकीचतयारामिवेत्यर्थः ११

86A

सूर्ययानवोप्फ्यैवविबुधाद्वयोविजिताश्चभिभूताः उरुस्त्रनूपुरैः पादैोक्वणयंत्सैवधनिमात्रेणोत्सर्थः १२ १३ तपा
सातपसोपतिंहरिमर्चंतस्त्रचंद्यासः १४ १९ मुनयोपिसंगात्मागेनानाहमिष्टेयंदध्युरेवकेवलंनतुप्रापुः तेनशि
वेन २ ननुमुनीनांकिंनुध्यानेनचोरत्वादित्याशंक्याह आत्मारामोपिलोकरचनायाःपालनाय ८ गुर्वाज्ञाका
रिणांशावदर्शनेस्वतएवभवतीतिआशयेनाह प्रचेतसइति ९ समुद्रमुपसमुद्रात्किंचिन्न्यूने उपोदकेवेति
विबुधासुरगंधर्वमुनिसिद्धनरोरगाः विजितासूर्ययादित्वक्वणयंत्सैवनूपुरैः १२ प्राचीनबर्हिषःपुत्राः
शतद्रुत्यांदशाभवन् तुल्यनामव्रताःसर्वेधर्मस्नाताःप्रचेतसः पित्रादिष्टाःप्रजासर्गेतपसेर्णवमाविशत्
दशवर्षसहस्राणितपसार्चंस्तपस्पतिं १४ यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता तंध्यायंतोजपंतश्चपूज
यंतश्चसंयुताः १५ विदुरउ प्रचेतसांगिरित्रेणयथासीत्पथिसंगमः यदुताप्याहहरःप्रीतःतन्नोब्रह्मन्वदा
र्थवत् संगमःखलुविप्रर्षेशिवेनदेहशरीरिणां दुर्लभोमुनयोदध्युरसंगाद्यमभीप्सितं ७ आत्मारामो
पिप[illegible]स्यलोककल्पस्यराधसे शक्त्यायुक्तोविचरतिघोरयाभगवान्भव ८ मैत्रेयउ प्रचेतसःपितुर्वा
क्यंशिरसादायसाधवः दिशंप्रतीचीप्रययुस्तपस्याहितचेतसः १९ समुद्रमुपविस्तीर्णमपश्यन्सु
महत्सरः मनइवस्वच्छप्रसन्नसलिलाशयं २०
कर्मप्रवचनीयः प्रसन्नाःसलिलाशयामत्स्याद्यायस्मिन् २० श्रीकृष्णायतर्पणंनमः श्रीरामचंद्रायैनमोनमः॥

शोभनसर्पतिया२

श्री॰ नीलोत्पलादीनामाकरं जन्मस्थानं उत्पलांभोजकल्हाराणिरात्रिदिनसंध्याविकासीनि इंद्रीवरनीलोत्प
भा॰च॰ ले तत्रापुनरुक्तिः प्राचुर्यज्ञापनार्थं हंसादिभिः कूजिते २१ मत्तानांभ्रमराणांसौस्वर्येणहृष्टरोमाणोल
टी॰ तांघ्रिपायस्मिन् पद्मकोशरजोदिक्षुविक्षिपतापवनेनोत्सवोयस्मिन् २२ तत्रमृदंगपणवादिवाद्यमनुप

८७

87

नीलरक्तोत्पलांभोजकल्हारेन्दीवराकरं हंससारसचक्राह्वकारण्डवविकूजितं २१ मत्तभ्रमरसौ
स्वर्यहृष्टरोमलतांघ्रिपं पद्मकोशरजोदिक्षुविक्षिपत्पवनोत्सवं २२ तत्रगांधर्वमाकर्ण्यदिव्य
मार्गमनोहरं विसिस्म्युराजपुत्रास्तेमृदंगपणवाद्यनु २३ तर्ह्येवसरसस्तस्मान्निष्क्रामंतंसहानुगं
उपगीयमानमंमरप्रवरंविबुधानुगैः २४ तप्तहेमनिकायाभंशितिकंठंत्रिलोचनं प्रसादसमु
खंवीक्ष्यप्रणेमुर्जातकौतुकाः २५ सतान्प्रपन्नार्तिहरोभगवान्धर्मवत्सलः धर्मज्ञान्शीलसंप
न्नान्प्रीतान्प्रीतउवाचहृ २६ रुद्रउ॰ यूयंवेदिषदःपुत्राविदितंवश्चिकीर्षितं अनुग्रहायभद्रंवएवंमे

तर्पा ज्ञकृतम् २२

२

तृ

स्यात् देवैर्मार्गैर्भेदैर्मनोहरंगानंर्वगानमाकर्ण्यविस्मयंप्राप्ताः पणंतरेमृदंगपणवादि श्रवतस्तत ते
षांध्वनिंचतिरस्कुर्वदित्यर्थः २३ तेचत्रिलोचनंवीक्ष्यजाताश्चर्याः प्रणेमुरित्युत्तरेणान्वयः २४ तप्तसुवर्ण
राशिसदृशाकांतिं शितिनीलःकंठोयस्यतं २४ २६ वेदिषदःबर्हिषदःविचिकीर्षितंभगवदाराधनंविदि ८७

87A

अनुग्रहकारणमाह यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतं रंहसः सूक्ष्मात्त्रिगुणात्प्रधानात् जी
वसंज्ञितात् पुरुषाच्च परं प्रकृतिपुरुषयोर्नियंतारमित्यर्थः २८ तत्किं तस्य महत्त्वमत्वादित्याह स्वधर्मनि
ष्ठः पुमान् बहुभिर्जन्मभिर्विरिंचितां प्राप्नोति ततोपि गुणातिशयेन मामेति भागवतस्तु अथ देहांते

यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे २८ स्वधर्मनि
ष्ठः शतजन्मभिः पुमान्विरिंचितामेति ततः परं हि मां अव्याकृतं भागवतोथ वैष्णवं पदं यथाहं वि
बुधाः कलात्यये २९ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा न मद्भागवतानां च प्रेयानन्योस्ति
कर्हिचित् ३० इदं विविक्तं जप्तव्यं पवित्रं मंगलं परं निःश्रेयसकरं चापि श्रूयतां यद्वदामि वः ३१ मै
त्रेय उ० इत्यनुक्रोशहृदयो भगवानाह तान्शिवः बद्धांजलीन्राजपुत्रान्नारायणपरो वचः ३२

अव्याकृतं प्रपंचातीतं वैष्णवं पदमेति यथाहं रुद्रो भूत्वा आधिकारिकवद्वर्तमानः विबुधा देवाश्चाधिका
रिकाः कलात्यये अधिकारांते लिंगभंगे सत्येष्यंति २९ अथो भागवता वासुदेवं प्रपन्ना यूयं मे प्रियाः स्थ भ
वद्भिरपि मयि प्रीतिः कार्येत्याशयेनाह मदन्यो भागवतानां च प्रेयान्नास्ति ३० अत इदं जप्तव्यं श्रूयतामि
ति विविक्तं असंकीर्णं यथा भवति ३१ ३२

स्तस्मादेवात्मत्राणाद्दष्टाएतेभ्यः प्रोक्तमिष्टदं स्तोत्रं प्राप्य प्रचेतोभ्यः कृपयाभगवान्शिवः तेजितंतवोक्त
षिः आत्मविद्वर्याणांस्वस्तयेशोभनसत्तायैस्वानंदलाभायेत्यर्थः अतोमेस्वस्तिस्वानंदसत्तास्तु ननुममो
त्कर्षोमदर्थेएवकिंनस्यात् तत्राह भवताराधसास्वानंदरूपेणराधंसिद्धं त्वंपरमानंदरूपेणैवनित्यंस्थित
इत्यर्थः अतएवभूतायात्मनेतुभ्यंनमः सर्वस्मैसर्वभूतायच ३३ सर्वरूपत्वंप्रपंचयति नमइतिसार्धैर्दश

श्रीरुद्रउवाच जितंतआत्मविद्वर्यस्वस्तयेस्वस्तिरस्तुमे भवताराद्धसाराद्धंस
र्वस्माआत्मनेनमः ३३ नमःपंकजनाभायभूतसूक्ष्मेंद्रियात्मने वासुदेवा
यशांतायकूटस्थायस्वरोचिषे ३४ संकर्षणायसूक्ष्मायदुरंतायांतकायच
नमोविश्वप्रबोधायप्रद्युम्नायांतरात्मने ३५

भिः पंकजलोकात्मकंनाभौयस्यतस्मैकारणात्मनेनमः कारणत्वादेवसृज्यानांप्राणिनांयेउपाधयः
भूतानिसूक्ष्माणितन्मात्राणिइंद्रियाणिच तेषामात्मनेनियंत्रेअंतः करणचतुष्टयाधिष्ठातृत्वेनप्रणमा
तिचतुर्भिः श्लोकार्धैः वासुदेवायचित्ताधिष्ठात्रे कूटस्थायनिर्विकाराय चित्तस्यैकरूपत्वात् ३४ संकर्षणाया
हंकाराधिष्ठात्रे सूक्ष्मायाव्यक्ताय दुरंतायअनंताय अंतकाय मुखाग्निनालोकदाहकाय विश्वस्यप्रबोधो

बोधोयस्मात् अंतरात्मनेबुद्ध्यधिष्ठात्रे ३५

88A

हृषीकाणामिंद्रियाणामीशायदिंद्रियेमनः तदात्मने सूर्यरूपेणप्रणमति परमहंसायसूर्यायपूर्णायते
जसाविश्वव्यापिने निभृतात्मनेतयहृदिशून्याय ३९ स्वर्गापवर्गद्वारायचशुचिनिग्रंतःकरणेनिषीदते
तिशुचिषदितिश्रुतेः हिरण्यवीर्यंतस्मै अग्निरूपाय चातुर्होत्रंकर्मतस्मैतत्साधनायेत्यर्थः ज्ञातःतेनतवेतद्धि
त्सावकाय ४० सोमत्वमाह ऊर्जेपितॄणामन्नाय इषेदेवानांचान्नरूपवरूपाय त्रय्याःपतयेनमः सूर्याग्निसो

नमोनमोनिरुद्धायहृषीकेशेंद्रियात्मने नमःपरमहंसायपूर्णायनिभृतात्मने ३९ स्वर्गापवर्ग
द्वारायनित्यंशुचिषदेनमः नमोहिरण्यवीर्यायचातुर्होत्रायतंतवे ४० नमऊर्जइषेत्रय्याःपतयेय
ज्ञरेतसे तृप्तिदायचजीवानांनमःसर्वरसात्मने "सर्वसत्वात्मदेहायविशेषायस्थवीयसे नमस्त्रै
लोक्यपालायसहओजोबलायच ४१ अर्थलिंगायनभसेनमोंतर्बहिरात्मने नमःपुण्यायलोकाय

मत्वेनैवतेजस्त्वमुक्तं जलत्वमाह सर्वरसात्मनेजलरूपाय ३८ सर्वेषांस \\ अमुष्मैभूरिवर्चसे ४२
त्वानांप्राणिनांये आत्मानःतेषांदेहायविशेषायपृथ्वीरूपायस्थवीयसेविराड्देहाय त्रैलोक्यपालाय वा
यवेसहआदिरूपायसहि प्राणरूपेणत्रैलोक्यंपालयति सहआदिधर्माणंचनभसेआकाशाय अर्था ३६
नांलिंगायप्रकाशकायशब्दगुणत्वात अंतर्बहिरात्मने अंतर्बहिर्व्यवहारालंबनाय एषांमहाभूतरूपत्वमुक्तं
अमुष्मैस्वर्गायभूरिवर्चसे एववैज्योतिष्मंतंपुण्यंलोकंयातीतिश्रुतेः ४२

श्री॰ प्रवृत्तायनिवृत्तायचकर्मणे पितृदेवाययाक्रमं पितृदेवप्राप्तिफलायच अधर्मफलरूपायचमृत्यवे ४१
भाग॰ दद्देशाश्चाशिषांकारणात्मने सर्वकर्मफलदात्रे मनवेसर्वज्ञायमंत्रात्मकायेतिवा विस्मृतेनप्रणमति बृह
टी॰ तेधर्माय परधर्मात्मनेकृष्णाय ४२ रुद्ररूपेणप्रणमति मीढुषेरुद्राय अहंकृतमहंकारः तदात्मने सर्व
८९ कर्तृकारणशक्तित्रयसमेतस्तस्मै ब्रह्मत्वेनप्रणमति चेतोज्ञाने आकूतिः क्रियातद्रूपाय वाचोविविध
८९ भूतिः सृष्टिर्यस्मात्तस्मै ४३ एवंनमस्कृत्यदर्शनंप्रार्थयते दर्शनमितिनवभिः भागवतैः सत्कृतंदर्शनंदे

प्रवृत्तायनिवृत्तायपितृदेवायकर्मणे नमोधर्मविपाकायमृत्यवेदुःखदायच ४१ नमस्तेआ
शिषामीशमनवेकारणात्मने नमोधर्मायबृहतेकृष्णायाकुंठमेधसे पुरुषायपुराणायसांख्य
योगेश्वरायच ४२ शक्तित्रयसमेतायमीढुषेहंकृतात्मने चेतआकूतिरूपायनमोवाचोविभूत
ये ४३ दर्शनंनोदिदृक्षूणांदेहिभागवतार्चितं रूपंप्रियतमंस्वानांसर्वेंद्रियगुणांजनं स्निग्धप्रो

ऽपुत्रानविताननम् ४५

माननंयस्मिन् ४५

दीप्तसम्यविवरणं रूपमित्यादिप्रदर्शयेत्यंते स्वानांभ ॥ इदानींभक्तसर्वसौंदर्यसंग्रहं चार्वायतचतुर्वी
क्षानांप्रियतमंरूपंदर्शयेतिनवमेनान्वयः सर्वेषामिंद्रियाणांयेगुणाविषयास्तेषामंजनंव्यंजकं सर्वेंद्रिय
विषयरूपमित्यर्थः सर्वेंद्रियाणिस्वगुणैरंजयतीतिवा ४४ स्निग्धः प्रोत्सर्पियोचनः तद्वद्वामं सर्वेषांसौंद
र्याणांसंग्रहएकत्रकारणंयस्मिन् चारवश्चायताश्चत्वारोबाहवोयस्मिन् सुजातेययोचितेसर्वावयवरुचिर

८९

89A

पद्मकोशेमध्येयानिपलाशानितद्वद्दलानीयस्मिन् सुकपोलमांसंयस्मिन् समौकर्णौविभूषणंयस्य
कुंडलयोरग्रेवक्ष्यमाणत्वात् ४८ प्रीत्याप्रहसितावविवापांगौयस्मिन् ४० स्फुरंतिकिरीटादीनियस्मिन् उ
न्नमर्द्धिः लक्ष्मीः यद्वा एतेकृत्तमाक्रहितत्कर्षोयस्यास्तितत् सिंहस्यस्कंधएवरितः प्रसरंतःकेसराएव
त्विषः ताहशीः सर्वतस्त्विषोविभ्रस्त्रासौभगग्रीवःकौस्तुभोयस्मिन् यद्वा सिंहस्येवयोस्कंधौतयोस्त्वि

पद्मकोशपलाशाक्षंसुंदरभ्रुसुनासिकं सुद्विजंसुकपोलास्यंसमकर्णविभूषणं ४८ प्रीतिप्र
हसितापांगमलकैरूपशोभितं लसत्पंकजकिंजल्कदुकूलंमृष्टकुंडलं ४० स्फुरत्किरीटवल
यहारनूपुरमेखलं शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् सिंहस्कंधत्विषोविभ्रत्सौभगग्रीवकौस्तुभं श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ४९ हाररेचकसंविग्नवलिवल्गुद
लोदरं प्रतिसंक्रामयद्विश्वंनाभ्यावर्तगभीरया ५०

षः कुंडलहारादिदीप्तीर्विभ्रदितिष्टव्यविशेषणं सौभगयुक्ताग्रीवायेनसकौस्तुभोयस्मिन् श्रियाहेतुभू
तयाक्षिप्तमस्तिरस्कृतोनिकषाश्मस्वर्णरेखांकितोनिकषपाषाणोयेनताहशेनोरसा उल्लसच्छोभमानं
४९ स्वासोच्छ्वासाभ्यांपूरकरेचकाभ्यांसंविग्नाश्च चलावलयस्ताभिः वल्गुदलवदश्वत्थपत्रसदृशमु
त्थ
दरंयस्मिन् प्रतिसंक्रामयतयतोनिर्गतोस्वतेनेवद्वारेणपुनःप्रवेशयदिव ५०
वि

श्री॰ भा॰ द॰ टी॰ ५॰

90 नै

श्यामश्रोण्यामधिकंरोचिस्नुयसीतंडुकूलेतत्र स्वर्णमयीमेखलायस्मिन् यंघ्रीचजंघेचऊरूचनिम्नेश्नुव
तेजानुनीचसमैस्याताभिरैतैः शोभनंदर्शनंयस्यसमास्यारवंगुल्फादयोयस्मिन् निम्नेजानुनीयस्मिन् शोभ
नेदर्शनेयस्यातिपरत्रयंवा ५१ पदाशीपदस्थानीयेन यद्वा एवंभूतेनपदोपलतितेदृपशरणंप्रदर्शयेत्यर्थः
शारदियत्पद्मतस्यपलाशांतद्द्रोचिर्यस्य तेनननखदीप्तिभिरंतर्भवमत्तानेविधुन्वता अपास्तप्रज्ञादादीनां
श्यामश्रोण्यधिरोचिस्नुडुकूलस्वर्णमेखले समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं ५१ पदाशर
त्पद्मपलाशरोचिषानखद्युभिरंतरघंविधुन्वता प्रदर्शयस्वीयमपास्तसाध्वसंपदंगुरोमार्गगुरुस्तमो
जुषां ५२ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सतां यद्भक्तियोगोभयदः स्वधर्ममनुतिष्ठतां ५३ भवा
न्भक्तिमतालभ्योडुर्लभःसर्वदेहिनां स्वाराज्यस्याप्यभिमतएकांतेनात्मविद्गतिः ५४ तंडुराराध्य
माराध्यसतामपिडुरापया एकांतभक्त्याकोवांछेत्पादमूलंविनाबहिः ५५
साध्वसंयेनतत् द्वेष्टुरो यतस्त्वमेवतमोजुषामज्ञानाप्रदर्शकोगुरुः ५२ अतिडुर्लभमिदंमयाप्रार्थितमिति
भीतंवाह एतद्रूपमनध्येयंध्यानार्हमेव नतुप्रत्यक्षमतः प्राप्यमित्यर्थः ५३ नहिकिंकेनापिनप्राप्यतेतत्रा
ह भवानिति डुर्लभत्वमेवाह स्वर्गराज्यंयस्यतस्याप्यभिमतःस्पृहणीयःकिंच एकांतेनयआत्मवित्तस्या
पिगतिर्गम्यः ५४ अतस्त्वद्व्यतिरेकेणनकिंचिद्वांछामीत्याह तंत्वामेकांतभक्त्याआराध्य बहिःस्वर्गादि

९०A

तत्रहेतुर्यंत्वत्पादमूलेशरणं प्रविष्टंकृतांतःकालोममायंवध्यइतिनाभिमानंकरोति किंकुर्वन्वीर्यंप्रभा
वःशौर्यमुत्साहः ताभ्यांविस्फुरितयाभ्रुवाविश्वंविध्वंसयन्नपि ५९ त्वत्पादेप्रविष्टस्यकृतांततयाभावः
कियानयःलाभः त्वद्भक्तसंगएवसंकलपुरुषार्थश्रेणिशिरसिनरीनर्तीत्याह क्षणार्धेनेति भगवत
स्तवसंगिनांसंगस्यापिक्षणार्धेनापिनस्वर्गंतुलयेसमंनगणयामिनचापुनर्भवंमोक्षं मर्त्यानामाशिषो
राज्याद्याःकिमुत ५० अथानंतोद्गतौ अनंतावयवद्दरावंद्वीयस्यतस्यकीर्तिर्यशः तीर्थंगंगातयोःक

यत्रनिर्विष्टमरणंकृतांतोनाभिमन्यते विश्वंविध्वंसयन्वीर्यशौर्यविस्फूरितभ्रुवा ५९ क्षणार्धेना
पितुलयेनस्वर्गंनापुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ५० अथानघांघ्रेस्तव
कीर्तितीर्थयोरंतर्बहिस्नानविधूतपाप्मनां भूतेष्वनुक्रोशसुसत्वशीलिनांस्यात्संगमोनुग्रहएष
नस्तव ५८ नयस्यचित्तंबहिरर्थविभ्रमंतमोगुहायांचविशुद्धमाविशत् यद्भक्तियोगानुगृहीतमं
तेगतिम् ५९

मेणान्तर्बहिःस्नानाभ्यांविधूतःपाप्मायेषां भूतप्रतेष्वनुक्रोशःकृ तमंजसामुनिर्विचष्टेननुतत्र
पासुसत्वंच रागादिरहितंचित्तंशीलंचार्जवादिविद्यते येषांतेषांसंगमोस्माकंस्यात् एषएवनस्त्वदनुग्रहः
तमवृत्तानेचत्वद्भक्तसंगादेवभवतीत्याह न यस्येतियेषांसतांभक्तियोगेनानुगृहीतंशुद्धंसद्यस्यचित्तंवा
ह्यार्थविविभ्रमंनभविष्यति तमोरूपायांगुहायांचनाविशत् लयंनप्राप्य तत्रतदासमुनिस्तवगतिंतत्त्वप

५८

श्री· भा· द· टी· ८१

९१

कीदृशंविश्वंतदाह यत्रेति ९ जगतउपादानत्वेनैवंकेवलतितंनिमित्तत्वेनापितदेवलक्षयन्नाह योमायये
दमिति यइदंविश्वमसदेवपरमार्थमिवासृजत् कथंभूतयाययाभेदबुद्धिरन्येषांभवति तया आत्मनित्व
यि दुःस्थपत्स्वकार्यैकर्त्वे मसममर्पया तंत्वानिरस्तभेदंप्रतीमहिजानीम ९। यद्यपित्वमेवनिर्भेदंब्रह्मतथा
पिप्रागुक्तसाकारंतवरूपंयेइदंइयजंतितएववेदागमतत्त्वज्ञाइत्याह क्रियाकलापैर्यैकमेयोगिनःसृजयं
यत्रेदंव्यज्यतेविश्वंविश्वस्मिन्नवभातियत् तत्त्वंब्रह्मपरंज्योतिराकाशमिवविस्तृतं ९ योमाययेदं
पुरुरूपयासृजद्बिभर्तिभूयःक्षपयत्यविक्रियः यद्भेदबुद्धिःसदिवात्मदुःस्थयातमात्मतंत्रंभगवन्
प्रतीमहि ९। क्रियाकलापैरिदमेवयोगिनःश्रद्धान्विताःसाधुयजंतिसिद्धये भूतेंद्रियांतःकरणो
पलक्षणंवेदेचतंत्रेचतएवकोविदाः ५८ त्वमेकआद्यःपुरुषःसुप्तशक्तिःतयारजःसत्वतमोवि
नितएवकोविदानत्वेतदनादृत्यकेवलज्ञा भिद्यते महानहंखंमरुदग्निवार्धराःसुरर्षयोभूतगणा
नेप्रवृत्ताः तंत्रेआगमे कथंभूतंमिदंभूतेंद्रियांतःकरणैरस्वतंत्रैर्यैडपलक्ष्यतेनियन्तृरूपंतत् ९३ नन्वा
भिन्नेमयिभेदंकुर्वतः संतोनकोविदानहितैर्भेदः क्रियतेत्वयैवक्रीडार्थंचेतनात्मकोभेदःकृतइत्याह त्वा
मिति आद्यस्त्वमेकएवसुप्तामायाख्याशक्तिर्यस्यतयाशक्त्या रजःसत्वतमसांद्वैधैकं यतोरजआदेःमहा
नहंकारःखंचमरुदग्निर्वार्धराभूःवारुदकं सुराश्चऋषयश्चभूतगणाश्चएकमिदंजगद्यतोभवतितद्विभिद्य ८१

सुप्तशक्तः ४३

तद्रूपत्वयः ४३

९१A

एतदुपपादयति सृष्टमिति जरायुजाण्डजस्वेदजोद्भिज्जरूपेण चतुर्विधं स्वांशेन प्रविष्टः अयोंऽशः इति हेतोः पुर

स्यातः सन्तः मंशं विद्वांसः पुरि शयनात्पुरुषं विदुः तर्हि किमीश्वरमेव संसारिणं विदुर्नेत्याह सारघामधुमल्लि

काःस्वाभिः सृष्टिं मधिवत्तल्लक्षविषयसुखमविद्याहतः सन् योऽश्नाति तं जीवं विदुः तथा च श्रुतिः तयोरन्यः पि

प्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति निर्णीतं च गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यर्थ ६३ तवतत्स

र्वं नियन्तः ऊतः संसारस्तमाह यः स्वशक्त्येदं सृष्टवान् स एष त्वं खलु भूतैरेव भूतानि मेघपङ्क्तीः वायुरिव का

लः स्वशक्त्येदमनुप्रविष्टस्तत् विविधं पुरमात्मांशकेन अथो विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते हृषीके मधु सा

रघं यः ६४ स एष लोकानतिचण्डवेगो विकर्षसि त्वं खलु कालयानः भूतानि भूतैरनुमेयतत्त्वो घनाव

लीर्वायुरिवाविषह्यः प्रमत्तमुच्चैरिति कृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसं त्वमप्रमत्तः सहसा

भिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ६६ कस्त्वत्पदाब्जं विजहाति पण्डितो यस्तेऽवमानव्ययमानके

लयन् लोकान्विकर्षसि संहरसि अनुमेयतत्त्वः अलक्ष्यस्वरूपः ६५ विकर्षणप्रकारमाह प्रमत्तमिति इति

कृत्यमेवमेवमिदं कर्तव्यमिति चिन्तयोच्चैः प्रमत्तं तत्र हेतुः विषयेषु लालसमतिकामुकं प्राप्तेऽपि विषये प्रवृद्धलो

भं अन्तकस्त्वमभिपद्यसे आक्रामसि त्वया लेलिहानो जिह्वयोष्ठौ प्रामोस्पृशन् सर्पो मूषकमिव ६६ अतः कस्त

त्पदाब्जं त्यजेत् पण्डितश्चेत् कथम्भूतः कस्तेऽवमानो नादरस्तेन व्ययमानं केतनं शरीरं यस्य सः यदस्माकं तु

तनः विशंकयास्म हुतार्थ निस्मृहि तोपगतिर्मन वस्था य

श्री॰
भा॰च॰
टी॰
९२
९२

उपसंहरति यद्येति रुद्रभयेनधर्मं अतोनज्ञातश्चिद्रयंयस्मातादृशीतिवसि ६८ ७० योगादेशंना
मैतत्स्तोत्रमुपासाद्यपाठतःप्राप्यमनसाधारयंतःअभ्यासेनजपत ७१ विश्वसृजांपतिःब्रह्मा ७२ सिस
अयत्वमाश्रितोब्रह्मन्परमात्मनिपश्यतं विसृंरुद्रभयधर्मममज्ञातश्चिद्रयागतिः ६८ इदंजप
तभद्रंवोविशुद्धान्नृपनंदनाः स्वधर्ममनुतिष्ठंतोभगवत्यर्पिताशयाः ६९ तमेवात्मानमात्मस्थं
सर्वभूतेष्ववस्थितं पूजयध्वंगृणंतश्चध्यायंतश्चासकृद्धरिं ७० योगादेशमुपासाद्यधारयंतोमु
निव्रताः समाहितधियःसर्वएतदभ्यसतादृताः ७१ इदमाहपुरास्माकंभगवान्विश्वसृक्पतिः
भृग्वादीनामात्मजानांसिसृक्षुःसंसिसृक्षतां तेवयंचोदिताःसर्वप्रजासर्गेप्रजेश्वराः अनेनध
स्ततमसःसिसृक्ष्मोविविधाःप्रजाः ७२ अथेदंनित्यदायुक्तोजपन्नवहितःपुमान् अचिराच्छ्रेयआ
प्नोतिवासुदेवपरायणः ७४ श्रेयसामिहसर्वेषांज्ञानंनिःश्रेयसंपरं सुखंतरतिदुष्पारंज्ञाननौ
व्यसनार्णवं ७५ यइदंश्रद्धयायुक्तोमद्गीतंभगवत्स्तवं अधीयानोदुराराध्यंहरिमाराधयत्यसौ ७६
हि२ विंदतेपुरुषोमुष्माद्यद्यदिच्छत्यसत्वरन् मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ७७ इदंयःक
ल्यउत्थायप्रांजलिःश्रद्धयान्वितः शृणुयाच्छ्रावयेन्मर्त्योमुच्यतेकर्मबंधनैः ७८
त्मसृष्टवंतः ७२ युक्तएकाग्रचित्तः ७४ ज्ञानमेवनौर्यस्य ७५ यःअधीयानोभवति ७६ अमुष्माद्धरेःअसा

वसत्वरन्नस्थिरः सन्मद्गीतंस्तोत्रंतेनगीतात्स्तुतात् एकपदवल्लभः प्रिय
आश्रयस्तस्मात् ७७ कल्येउषसि ७८
२

तपश्चरंततपसोतेईप्सितंप्राप्स्यथ ७९ इतिचतुर्थेचतुर्विंशः २४ प्रचेतःसुतपस्यस्त्सुतत्रैवनारदोब्रुणी
प्राचीनवर्हिषेध्यात्मपारोक्षेणाहपंचभिः पुरंजनकथाव्याजात्संचविंशेत्रनारदः आत्मनोबुद्धिसंगेन
विविधामाहसंसृतिं प्रचेतःसुतपस्तोब्रेताप्यमानेषुनारदः पुरंजनकथाकूटंप्राहप्राचीनवर्हिषे १२

गीतंमयेदंनरदेवनंदनाःपरस्यपुंसःपरमात्मनस्तव जपन्तएकाग्रधियस्तपोमहच्चरध्वमंते
ततप्राप्स्यथेप्सितं ७९ इतिचतुर्थेरुद्रगीतंनामचतुर्विंशः २४ मैत्रेयउ॰ इतिसन्दिश्यभगवा
न्वार्हिषदैरभिपूजितः पश्यतांराजपुत्राणांतत्रैवांतर्दधेहरः १ रुद्रगीतंभगवतःस्तोत्रंसर्वेप्र
चेतसः जपंतस्तेतपस्तेपुर्वर्षाणामयुतंजले २ प्राचीनवर्हिषंक्षत्तःकर्मस्वासक्तमानसं नार
दोध्यात्मतत्त्वज्ञःकृपालुःप्रत्यबोधयत् ३ श्रेयस्त्वंकतमद्राजन्कर्मणात्मनईहसे दुःखहानिःसु
खावाप्तिःश्रेयस्तन्नेहचेष्यते ४ राजोवाच नजानामिमहाभागपरंकर्मापविद्धधीः ब्रूहिमेविमलं
|| ज्ञानंयेनमुच्येयकर्मभिः ५
प्रचेतःसुतपश्चरत्सुनारदःप्राचीनवर्हिषंबोधितवान् अतःप्रचेतसांकथा
मसमाप्यैवतत्पितुर्वृत्तमाह प्राचीनवर्हिषमिति ३ श्रेयःफलमीहसेइच्छसिईहकर्मणातदुभयंनेष्यते
विचारकैः ४ परंश्रेयः मोक्षंकर्मभिरपविद्धाविक्षिप्ताधीर्यस्य ५ ॥

किंच गृहेषुस्थितःपुत्रादिषुचपुरुषार्थधीर्यस्य ६ कर्मफलेषुवैराग्यमुत्पाद्यब्रह्मविद्यामुपदेष्टुंयोगानुभ
वेनयज्ञपशून्व्यस्तंप्रदर्शयाह भोभोइतिसंज्ञापितान्मारितान् ७ एतेत्वांसंपरेतंमृतंसंप्रतीक्षंतेवैशसंत्व
त्कृतंतापीडांस्मरंतः ततस्त्वायःकूटैःलोहयंत्रमयैःशृंगैःछिंदंतिछेत्स्यंति ८ अत्राऽस्मिन्नर्थकटेनिस्तारकम
मुमितिहासंकथयिष्यामि ९ तत्रजीवस्यविषयासक्त्यासंसारः सचस्वरूपग्रहणेननिवर्ततइतिवक्तुंविप

गृहेषुकूटधर्मेषुपुत्रदारधनार्थधीः नपरंविंदतेमूढोभ्राम्यन्संसारवर्त्मसु ६ नारदउ॰ भोभोःप्र
जापतेराजन्पशून्पश्यत्वयाध्वरे संज्ञापिताञ्जीवसंघान्निर्घृणेनसहस्रशः ७ एतेत्वांसंप्रती
क्षंतेस्मरंतोवैशसंतव संपरेतमयःकूटैःछिंदंत्युत्थितमन्यवः ८ अत्रतेकथयिष्येऽमुमिति
हासंपुरातनं पुरंजनस्यचरितंनिबोधगदतोमम ९ आसीत्पुरंजनोनामराजाराजन्बृहच्छ्र

र्थगृहीतस्यसाक्षाद्बोधयितुमशक्तेः राजवृत्तांत॥ वाः तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टि
मिवाह आसीदिति पुरंजनादीन्स्वयमेवेतः पंचमेऽध्यायेव्याख्यास्यति तथापिसुखग्रहणाययथो
पयोगंकिंचिद्व्याख्यास्यामः तत्रस्वकर्मभिः पुरंजनोजीवः विज्ञातंनामयस्यनचविज्ञातंचेष्टितंयस्य ९३
सईश्वरस्तस्यसखा यद्वा विज्ञातंचेष्टितंजीवप्रेरणादिलक्षणंयस्यजीवपारतंत्र्यस्यानुभवसिद्धत्वा १०

93A श्रावणं भोगायतनं देहं ११ यावन्तः पुरस्ताः तस्य तस्य कामोपपत्तेः प्राप्तौ साधनमेते गवादिदेहानामैहि
कपारलौकिकभोगभोग्यत्वाभावात् तथा च श्रुतिः ताभ्यो गामानयत्ता अब्रुवन्न वै नो यमलमिति ताभ्यो अश्व
मानयत्ता अब्रुवन्न वै नो यमलमितीति १२ हिमवतो दक्षिणे पृष्ठसानुप्रकर्मक्षेत्रे भारतवर्षे पुरीं मनुष्य
शरीरं लक्षितानि दृष्टानि सर्वाणि लक्षणानि यस्यां अथ पंगुत्वादिदोषरहितामित्यर्थः १३ तामनुवर्णय

सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः नानुरूपं यदाविन्दद् अभूत्स विमना इव ११ न सा
धुमेने ताः सर्वा भूतले यावतीः पुरः कामान्कामयमानोसौ तस्य तस्योपपत्तये १२ स एक
दा हिमवतो दक्षिणेष्वथ सानुषु ददर्श नवभिर्द्वार्भिः पुरीं लक्षितलक्षणां १३ प्राकारो
पवनाट्टालपरिखैरक्षतोरणैः स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः १४

ति त्रिभिः अत्र किंचित्सादृश्यमवलंब्य कथासौंदर्याय प्राकारादीनि वर्णयति परिखैरिति पुंस्त्वमार्षं अक्षा
णि गवाक्षाः तोरणादयः शरीरावयवाः प्राकारादिरूपावयवत्वेन रूप्यन्ते स्वर्णादिशृंगैः शिखरैर्युक्ता ये गृहा
स्तैः संकुलामिति आधारादिचक्राणि गृहाः शृंगाणि च राजसादिस्वभावा विवक्षिताः १४

॥ ॥ ॥

नो

श्री· भा·चं· टी· २४ ९५

नीलादिभिः लक्ष्मप्रहर्म्यस्थलीयमांग्रहणमाणिक्यंस्थलीहृदयंनाडीनीलादिभावेनलक्ष्यते तत्तद्विषया
वासनाव्याभोगवतीनागपुरीमिव १५ सभासमाजस्थानं चत्वरंचतुष्पथः रथ्याराजमार्गः आक्रीडायतनं
द्यूतादिस्थानं आपणोहट्टः तैः चैत्यंजनानांविश्रामस्थानं ध्वजेषुपताकाः ताभिरभियुक्तां अत्रचविषय
निष्टबुद्धियोगेनजीवस्यदेहमेवंध्यइतिविवक्षयाविषयवर्गवाह्योपवनत्वेनरूपयति तद्विशेषात्स्वकंद

नीलस्फटिकवैडूर्यमुक्तामरकतारुणैः लक्ष्मप्रहर्म्यस्थलीदीप्तांश्रियाभोगवतीमिव १५ सभाच
त्वररथ्याभिराक्रीडायतनापणैः चैत्यध्वजपताकाभिर्युक्तांविद्रुमवेदिभिः १६ पुर्यास्तुवाह्योपव
नेदिव्यद्रुमलताकुले नदद्विहंगालिकुलकोलाहलजलाशये हिमनिर्झरविप्रुष्मत्कुसुमाक
रवायुना चलत्प्रवालविटपनलिनीतटसंपदि १७ नानारण्यमृगव्रातैरनावाधेमुनिव्रतैः आहूते

नादीन्विद्रुमलतादिभावेनशेषः कृष्णालंकारः १६ वाह्योपवनेषु॥ मन्यतेपांथायत्रकोकिलकूजितैः स्म
मदोद्ददर्शीतिचतत्र्यैनान्वयः नदंतोविहंगालिकुलानांकोलाहलोयेषुतेजलाशयायस्मिन् १७ हिमनिर्झरा
णांविप्रुषोविंदवः तद्वताकुसुमाकरसंबंधिनावायुनाचलंतः प्रवालाविटपाः शाखाश्चयेषांतैः वृक्षैर्नलि
नीनांसरसीनांतटेषुसम्पत्समृद्धिर्यस्मिन् अनावाधेनत्यक्तवाधरहितेमुनिव्रतैरहिंसैरात्मानमाहूतमिव

राम २४

१५ग्र तत्रप्रमदोत्तमांविवेकवतींबुद्धिंददर्श यदृच्छयागतामितितयोः संबंधस्यदुर्निरूपत्वंदर्शयति तामन्नुव
र्णयति सार्धैः चतुर्भिर्दशभिः ज्ञानकर्मेंद्रियैः एकैकंप्रत्येकंशतमनंतावृत्तयस्तासांनायकैः पतिभिः स
ह पावंतरेनायकाः स्त्रियोयेषांतेः २० पंचशीर्षाणिवृत्तयोयस्यतेन अहिनाप्राणेन प्रतीहारेणपालकेन

यदृच्छयागतांतत्रददर्शप्रमदोत्तमां भृत्यैर्दशभिरायांतीमेकैकशतनायकैः २० पंचशीर्षाहि
नागुप्तांप्रतीहारेणसर्वतः अन्वेषमाणामृषभमप्रौढांकामरूपिणीं २१ सुनासांसुदतींबालांः
सुकपोलांवराननां समविन्यस्तकर्णाभ्यांबिभ्रतींकुंडलश्रियं २२ पिशंगनीवींसुश्रोणिंश्यामां
कनकमेखलां पद्भ्यांक्वणद्भ्यांचलतींनूपुरैर्देवतामिव २३ स्तनैर्व्यंजितकैशोरैःसमवृत्तैर्निरंत
रैः वस्त्रांतेननिगूहंतींव्रीडयागजगामिनीं २४
गुप्तां ऋषभंभर्तारं २१ गंधवत्तानादिभिर्उत्सवघवैः
सुनासत्वादिरूप्यतेसमंविन्यस्तौरचितौताभ्यांकुंडलशोभांदधती २२ अत्रमधेहिसौम्यमनश्रतियत्क्षंतद
न्नमेत्यादिश्रुत्यनुसारेणश्यामामित्युक्तं नूपुरैः क्वणद्भ्यांनूपुरेणपादांगुलीयकानामप्युपलक्षणंदृऊ
वचनम् २३ व्यंजितकैशोरंयौवनोपक्रमाभ्यांसमौवृत्तौच २४

वर्णोक्ति

श्री॰ तामाहेतितयोः संवादोक्तेः संबंधदार्ढ्याय अपांगएवपुंखोमूलप्रांतोयस्यकंटकाणास्यतेनस्पृष्टो
भा॰ द॰ विद्धः प्रेमणाउद्भवोर्धनुः स्थानीयायस्मिनतेन २५ रुतःस्थानादिहागतासि हेसतिपुर्याः समीपस्थाउपरी
टी॰ भूःतामालस्यकिंकर्तुमिच्छसीत्यर्थः २६ तवयेनुपश्चाः अनुवर्तिनः एतेके एकादशमहान्भटोहरहलवे
९५
95

तामाहललितंवीरः सव्रीडस्मितशोभनां स्निग्धेनापांगपुंखेनस्पृष्टःप्रेमोद्भमद्भ्रुवा २५
कात्वंकंजपलाशाक्षिकस्यासीहरुतःसति इमामुपपुरींभीरुकिंविकीर्षसिशंससे २६
कएतेनुपथायेतेरकाएकादशमहाभटाः एताबाललनाःसुभ्रुकोयंतेहिप्रियःस्मरः २७
त्वंश्रीर्भवान्यस्यथवाग्रमापतिंविचिन्वतीकिंमुनिवद्रहोवने त्वदंघ्रिकामाप्तसमस्त
कामंक्वपद्मकोशः पतितः कराग्रात् २८

नवद्रयमाणोयेश्वदशास्तुते बुद्धेर्मनसःइत्यगुपा
दानं बुद्धिपरिवारकेंद्रियमहायतयातत्परिचारकत्वविवक्षया २७ त्वंश्रीः किंपतिंधर्मविचिन्वती अथ
वाभवानीपतिंविचिन्वती किंवाक्सरस्वतीब्रह्माणं रमापतिंविष्णुं मुनिरिवसेयतासती कथंभूतंप ९५
तिं त्वदंघ्रिकामेनैवत्वदंघ्रिकामनयैवप्राप्ताः समस्ताः कामायेनतम् २८

पिर्व

95A

हेवीरत्वमास्तांमय्येतं अन्यतमापि नभवसि यतोभुविस्पृक् नहिदेवताभुवंस्पृशंति वीरवरेणमयालोकं
अलंकुरु कथंत्वयासहालंकरोमीतिचेत्तत्राह अदभ्रकर्मणामदभ्रमनल्पंकर्मत्वत्संगाद्यस्यतेन स्वतोः
कर्मतेन त्वत्संगात्सकर्मोभवामीत्यर्थः परंवैकुंठे २९ यद्यस्मादीषोपांगेनविशिखेनविखंडितमिंद्रियंम

नामुंवरोर्वन्यतमाभुविस्पृक्कुरीमिमांवीरवरेणसाकं अर्हस्यलंकर्तुमदभ्रकर्मणालोकंपरंश्रीरिव
यज्ञपुंसः २९ यदेक्षमाणापांगविखंडितेंद्रियंसव्रीडभावस्मितविभ्रमभ्रुवा त्वयोपसृष्टोभगवान्मनोभ
वः प्रबाधतेथानुगृहाणशोभने ३० त्वमाननंसुभ्रुसुतारलोचनंव्यालंविनीलालकवृंदसंवृतम्
उन्नीयमेदर्शयवल्गुवाचकंयद्व्रीडयानाभिमुखंशुचिस्मिते ३१ इत्थंपुरंजनंनारीयाचमानमधी
रवत् अभ्यनंदततंवीरंहसंतीवीरमोहिता ३२

नोयस्यतंमनोभवोबाधते अथतस्मादनुगृहाण सव्रीडंयद्भावेनप्रेमणास्मितंतेनविभ्रमंतीयाभ्रूः तयाउपसृ
ष्टः प्रेरितः ३० यद्व्रीडयामेमुखंनभवतितदाननमुन्नीयमेदर्शय शोभनेभ्रुवौयस्मिन् सुतारेशोभनकनीनिके
लोचनेयस्मिन् व्यालंबिनोदीर्घायेनीलाअलकास्तेषांवृंदेनसंवृतंवल्गूनिवाचकानिवाक्यानियस्मिन् ३१
हेवीरसापितंहसंतीमोहितासतीतमाह ३२

श्री· यत्त्वंकस्यासिइत्यनेनकस्यपुत्रीगोत्रेणेति क्वात्वमितिचकिंनामासीतितत्राह आत्मनोममपरस्यतवापि
भा·च· कर्तारंमम्मद्ध विद्मः गोत्रंनामचयत्कृतंभवतितंनचविद्मः ३२ आत्मनोममशरणामियंपुरीयेननिर्मितातं
चनविद्मः ३३ यत्त्वंकपतेअनुपश्याइतितत्राहपतेइति ३४ आस्तांनामगोत्रादियत्रागतोसिएतदिच्छाभ
९९ द्रंतावत् ग्राम्यान् इंद्रियग्रामार्हान् उद्वहिष्यामिसंपादयिष्यामि स्वबंधुभिसखीभिश्च ३५ समाःसे
96

नविदामवयंसम्यक्कर्तारंपुरुषर्षभ आत्मनश्चपरस्यापिगोत्रंनामचयत्कृतं ३२ इहाद्यसंतमा
त्मानंविदामनततःपरं येनेयंनिर्मितावीरपुरीशरणमात्मनः ३३ एतेसखायःसख्योमेनरना
र्यश्चमानद सुप्तायांमयिजागर्तिनागोयंपालयन्पुरीं ३४ दिष्ट्यागतोसिभद्रंतेग्राम्यान्कामानभी
प्ससे उद्वहिष्यामितांस्तेहंस्वबंधुभिररिन्दम ३५ इमांत्वमधितिष्ठस्वपुरींनवमुखींविभो मयोप
नीतान्गृह्णानःकामभोगान्शतंसमाः ३६ कंनुत्वदन्यंरमयेह्यरतिज्ञमकोविदं असंपरायाभिमु
खमस्वस्तनविदंपशुं ३७

वत्सरान् मनुष्यदेहप्रवेशात्कृतमित्यर्थः ३६ प्रवृत्तिस्वभावत्वान्निवृत्तिमिति
न्नाह एवंकंतत्संगमभिनंदतिपंचभिः त्वत्तोन्यंकंरमये अरतिज्ञंनैष्ठिकं अकोविदमनिषिद्धस्त्रवत्यागिनं
संपरायोमरणं तदनभिमुखंपरलोकचिन्ताशून्यं अस्वस्तनविदं श्वःइदंकर्तव्यमितिलोकचिंताशून्यंपशुवत्तं ९६ ३०

96A अत्र गार्हस्थ्ये प्रजानंदः पुत्रसुखं अमृतं मोक्षः केवलिनो यतयः ३८ गृहाश्रम इति यत् क्षेमार्हं शरीरिणा
माश्रयं ३९ ४० भोगे भोगयोः सर्पदेहाकारयोस्तव भुजयोर्यत्र सज्जेत एवंभूतं कस्याः स्त्रिया मनः स्यात् न
कस्यापि प्रियो भवान् अनाथवर्गाः दीनास्तेषामाधिं अलमत्यर्थमपोहितुं सर्वत्र चरति केनापोहितुं घृण

धर्मो ह्यत्रार्थकामौ च प्रजानंदोऽमृतं यशः लोका विशोका विरजा यान्न केवलिनो विदुः ३८ पितृदे
वर्षिमर्त्यानां भूतानामात्मनश्च ह क्षेमं वदंति शरणं भवेऽस्मिन्यद्गृहाश्रमः ३९ का नाम वीर विख्या
तं वदान्यं प्रियदर्शनं न वृणीत पतिं प्राप्तं मादृशी त्वादृशं स्वयं ४० कस्या मनस्ते भुवि भोगिभोगयोः
स्त्रिया न सज्जेद्भुजयोर्महाभुज योऽनाथवर्गाधिमलं घृणोद्धतः स्मितावलोकेन चरत्यपोहितुं ४१
नारद उवाच इति तौ दंपती तत्र समुद्य समयं मिथः तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ४२ उ
पगीयमानो ललितं तत्र तत्र च गायकैः क्रीडन्परिवृतः स्त्रीभिः ह्रदिनीमाविशच्छुचौ ४३

योद्धतः अतिशायितो यः स्मितपूर्वकोऽवलोकस्तेन ४१ समुद्य समुदीर्य समाः संवत्सरान् ४२ तत्र जाग्रदव
स्थासंक्षेपेणाह उपगीयमान इति सुषुप्तावस्थामाह ह्रदिनीं हृदयाकाशं स्वापस्थानं अनेन सुषुप्तावस्था
द्योतिता शुचौ निदाघे ४३

श्री॰ भा॰ च॰ टी॰ ८

97

इदानींनवद्वारएवंकप्रदर्शनेनजाग्रदवस्थांप्रपंचयति सप्तेतियावदध्यायसमाप्तिः तस्याः उपरिकृताद्वा
रः सप्तवृताइतिपाठेसंवृताः नेत्रेनासिके श्रोत्रेमुखंचेतिसप्त अधोद्वेद्वारौगुदलिंगे यः कश्चनेति आ
त्मनः सम्यगविज्ञानादनियतत्वाच्च ४४ तासांसप्तसुपंचद्वारः पौरस्त्याः पूर्वदिग्भवाः ४५ खद्यो
तवदल्पप्रकाशावामनेत्ररूपा आविःप्रकटंमुखंयस्याः सावहुप्रकाशाद्दक्षिणनेत्रलक्षणातस्माद्दक्षि

सप्तोपरिकृतंद्वारः पुरस्तस्यास्तुद्वेअधः पृथग्विषयगमनार्थंतस्यांयः कश्चनेश्वरः ४४ पंचद्वार
स्तुपौरस्त्यादक्षिणैकातथोत्तरा पश्चिमेद्वेअमूषांतेनामानिनृपवर्णाय ४५ खद्योताविर्मुखीचप्रा
ग्द्वारावेकत्रनिर्मिते विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः नलिनीनालिनीचप्राग्द्वारावेकत्र
निर्मिते अवधूतसखस्ताभ्यांविषयंयातिसौरभं ४७ मुख्यानामपुरस्ताद्द्वाः तयापणंबहूदनौ

णार्थंमात्मनोवीर्यंवत्तरमितिश्रुतेः स्वानुभवाश्चतत्रप्रकाशाधिक्यं ७॥ विषयोयातिपुरस्तादुभेसन्नावि
कत्रसंलग्नौविभ्राजितंरूपंद्युमत्सखः चक्षुः सहितः ४८ नलनालशब्दौछिद्रवाचिनौ तद्वतिनलिनीना
लिनीवामदक्षिणनासिके अत्रापिसत्ताभेदादेवकार्यस्यनाधिक्यमेवंवज्ञेयंअवधूतोवायुस्थितिस्थितोघ्राणः
सौरभंगंधं ४७ मुख्याः प्रधानाआस्यआपणोभाषणं वहूदनमिश्रमन्नंवक्रोदनइत्यनुक्तिः पयोत्तवादन्वात

पञ्चाश्रितः ४८

रसंगंरसमेदिप्यं विषयोणीमिद्धियंताभ्यांश्रुतितः ४८

८

९७A

दक्षिणेनेतिचनंतृतीया किंच दक्षिणस्यांदिशीत्यस्मिन्नर्थे तद्धितोयमेनप्रत्ययोव्ययसंज्ञः एवमुत्तरेणे
ति अयमर्थः पंचानांविषयाणामन्यतोनवगतानांप्रकाशनायालमिदंपांचालंशास्त्रंश्रवणकालेचबला-
धिक्याद्दक्षिणकर्णः प्रथमंवर्तते शास्त्रेचप्रथमंश्रोतव्यंकर्मकांडमित्येवंतावतायेनप्रवृत्तंमत्तस्यकर्मकांड
स्यदक्षिणकर्णेनश्रवणमिष्यते ततस्तदर्थमनुष्ठायपितृभिराहूतः पितृलोकप्रापकंपितृयानंप्रपद्यते त

पितृहूर्नामपुर्याद्वादक्षिणेनपुरंजनः राष्ट्रंदक्षिणपंचालंयातिश्रुतधरान्वितः ४९ देवहूर्नाम
पुर्याद्वाउत्तरेणपुरंजनः राष्ट्रमुत्तरपंचालंयातिश्रुतधरान्वितः ५० आसुरीनामपश्चाद्द्वास्तयाया
तिपुरंजनः ग्रामकंनामविषयंदुर्मदेनसमन्वितः ५१ निर्ऋतिर्नामपश्चाद्द्वास्तयायातिपुरंजनः
वैशसंयातिविषयंलुब्धकेनसमन्वितः ५२

त

इनेनप्रकारेणपितृणामाह्वानमनेनभवतीति पितृहूर्दक्षिणः उत्तरोदेवहूः स्मृतः प्रवृत्तंचनिवृत्तंचशा-
स्त्रंपांचालसंज्ञितं पितृयानंदेवयानंश्रोत्राख्यश्रुतधराद्व्रजेतइति ४९ ५० असुराणामिंद्रियारामाणांतेषामियमासुरीशि
श्नद्वाः ग्रामकंग्राम्यजनानांकंसुखंयस्मिन्व्यवाय दुर्मदेनगुह्येंद्रियेण ५१ निर्ऋतिर्नामगुदः मलस्यद्वारत्वात्
वैशसंमलविसर्गं लुब्धकेनपायुना ततोन्यत्रातस्यसुडः स्वग्रामैः लुब्धकसाम्य ५२

अमीषांमध्येनिर्वाक्पादः पेशस्कृद्धस्तः तावुभावन्धौछिद्राभावात् स्वतोज्ञानक्रियाशक्त्याभावाच्चअक्षण्वता
एवतामिंद्रियवतांदेहानामधिपतिःपुरंजनः त्वगिंद्रियस्यानुवृत्तिःसर्वेष्वंतर्भावितत्वात् ५२ अंतःपुरंहृद

अन्धावमीषांपौराणांनिर्वाक्पेशस्कृतावुभौ अक्षण्वतामधिपतिस्ताभ्यांयातिकरोतिच ५३ स
यर्ह्यंतःपुरगतोविषूचीनसमन्वितः मोहंप्रसादंहर्षंवायातिजायात्मजोद्भवं एवंकर्मसुसंसक्तः
कामात्मावंचितोबुधः महिषीयद्यदीहेततत्तदेवान्ववर्तत ५५ क्वचित्पिबंत्यांपिबतिमदिरांमद
विह्वलः अश्नंत्यांक्वचिदश्नातिजक्षंत्यांसहजक्षिति क्वचिद्गायतिगायंत्यांरुदंत्यांरोदितिक्वचित्
क्वचिद्धसंत्यांहसतिजल्पंत्यामनुजल्पति ५७ क्वचिद्धावतिधावंत्यांतिष्ठंत्यामनुगच्छति अनुशेते
शयानायामन्वास्तेक्वचिदासतीं ५८ क्वचिच्छृणोतिशृण्वंत्यांपश्यंत्यामनुपश्यति क्वचिज्जिघ्रति
जिघ्रंत्यांस्पृशंत्यांस्पृशतिक्वचित् ५९ क्वचिच्चशोचतींजायामनुशोचतिदीनवत् अनुहृष्यतिहृष्य
त्यांमुदितामनुमोदते ६० सतीमासीनाम् ५८ ६०

यंगतः विषूचीनंसर्वतोमुखं मनःमोहप्रसादहर्षाः तमःसत्वरजः कार्याणि जायाबुद्धिःआत्मजाइंद्रिय
परिणामास्तदुद्भवं ५४ ईहितईहित अन्ववर्ततचकार ५५ तदेवाहक्वचिदितिजक्षंत्याभक्षयंत्या ५६ आ ५७

जाग्रदवस्थां ३

सर्वाअसंगत्वादिलक्षणाप्रकृतिःस्वभावोवंचितोयस्य सर्वथाप्रकृत्यावंचितइतिवानेच्छन् अनिच्छन्
क्लैब्यात्यारक्षणात ६२ इतिचतुर्थेपुरंजनोपाख्यानेपंचविंशः २५ षड्विंशेमृगयाव्याजात्स्वप्नजागरणो-
चितः तद्बुद्धित्यागयोगाभ्यांसंसृतिःसाप्रपंच्यते तदेवमात्मनिउपाधिकृतांस्वप्नावस्थांचोक्त्वाइदानींस्व-
प्नावस्थामाह सएकदेतिदशभिः महेष्वासोधनुः कर्तृत्वभोक्तृत्वाद्यभिनिवेशोयस्य सरथमारुह्य

कर्तृत्वभोक्तृत्वाभिनिवेशः

विप्रलब्धोमहिष्येवंसर्वप्रकृतिवंचितः नेच्छन्ननुकरोत्यज्ञःक्लैब्यात्क्रीडामृ
गोयथा ६२ इतिचतुर्थस्कंधेपुरंजनोपाख्यानेपंचविंशः २५ नारदउः सएक
दामहेष्वासोरथंपंचाश्वमाशुगं द्वीषंद्विचक्रमेकाक्षंत्रिवेणुंपंचबंधुरं १ प्राणाः।

स्वप्नरचितंदेहं ज्ञानेंद्रियाणि

द्वीषं अहंता ममता
द्विचक्रं पुण्य पाप
एकाक्षं प्रधानं
त्रिवेणुं गुणत्रयः

पंचप्रस्थंवनमगादितितृतीयेनान्वयः रथंतदानीमेवविधृतंस्वप्नदेहंजाग्रद्देहस्यशतसंवत्सरोपभोग्यत्वं
पुरत्वेनोक्तत्वात पंचज्ञानेंद्रियाण्यश्वायस्यआशुगंशीघ्रगतिद्वेअहंताममतेईषेदंडिकेयस्य द्वेपुण्यपा
पेचक्रेयस्य एकप्रधानमक्षोयस्यत्रयोगुणावेणवोध्वजायस्य पंचप्राणावंधुराणिवन्धुना
नियस्य १ ॥

श्री· एकं मनः रश्मिः प्रग्रहो यस्य एका बुद्धिः दमनः सूतो यस्य तं च तं च एकं हृदयं नीडं रथिन उपवेशस्थानं
भा·स्कं· यस्मिन् द्वौ शोकमोहौ कूवरौ युगबंधनस्थाने यस्य पंच शब्दादयो विषयाः प्रक्रियंते प्रक्षिप्यंते यस्मिन्
टी· अस्य व्याख्यानं भविष्यति पंचेंद्रियार्थप्रक्षेप इति सप्त धातवो वरूथा रक्षार्थं चर्मावरणानि यस्य पंच
११ कर्मेंद्रियाणि विक्रमा गतिप्रकारा यस्य २ हेमोपस्करणं सौवर्णाभरणं स्वर्णवर्म वर्म कवचं रजोगुणा
९९ वृतः अत एव पृथुधिः इषुधिः निषंगः अनंतवासनो ऽहंकारोपाधिः एकादशो मनोरूपश्चमूनाथः सेनापति

मनः बुद्धिः हृदयं शोकमोहौ विषया धातवः कर्मेंद्रियाणि

रजोगुणावृतः २ एकारश्म्येकदमनमेकनीडं द्विकूबरम् पंचप्रहरणं सप्तवरूथं पंचविक्रमम् २ हे
मोपस्करमारुह्य स्वर्णवर्माऽक्षयेषुधिः एकादशचमूनाथः पंचप्रस्थमगाद्वनं ३ च
चार मृगयां तत्र दृप्त आत्तेषुकार्मुकः विहाय जायामतदर्हां मृगव्यसनलालसः ४

एस्य मनसः वासनामयस्य प्रवृत्तत्वात् संकल्पविकल्पात्मकस्य वृत्तिहृदलत्वेनावस्थानस्य च मूर्तोपायत्वमि
ति विभागः पंच शब्दादयो विषयाः प्रस्थाः सानवो यस्मिन् तद्वनं भजनीयं देशमगात् ३ आत्ता गृहीता इ
षवो रागद्वेषादिरूपाः कार्मुकं च भोगाद्यभिनिवेशरूपं येन जायां विवेकवतीं बुद्धिं विहाय अतदर्हां त्यागा ९९
नर्हां त्यागे हेतुः मृगयां तद्रूपत इति मृगा विषयाः तेषु व्यसनं भोगासक्तिः तेन लालसातिस्पृहा यस्य ४ ॥

99A

वाणैः गणादिभिः वनेषु भजनीयदेशेषु वनचरान्भजनीयविषयान् न्यहनत् आत्मसात्कृतवान् क
थापत्तेत्तस्पष्टमेव ५ आसंरीहृतिमाश्रितेतिकिमितिमृगयानिषिध्यते कथापदेतावद्राज्ञो विहितैव
सा अथ्यात्मपतेपि जीवस्य विषयोभोगो विहित एवेत्याशंक्याह तीर्थेषिति त्रिभिः अयंभावः नहि मृग
या विधीयते रागप्राप्तत्वात् किंतु नियम्यते प्रवृत्ति शंकोच्यते नियममेव षड्भिः प्रदर्शयति यद्यलम

आसंरीहृतिमाश्रित्य चोरात्मानिरवग्रहः न्यहनन्निशितैर्बाणैः वनेषु वनगोचरान् ५ तीर्थेषु
प्रतिदृष्टेषु राजामेध्यान्पशून्वने यावदर्थमलंलब्धोहन्यादितिनियम्यते ६ य एवं कर्मनियतं
विद्वान्कुर्वीत मानवः कर्मणा तेन राजेंद्र ज्ञानेन सनलिप्यते ७ अन्यथाकर्मकुर्वाणो माना
रूढो निबध्यते गुणप्रवाहपतितो नष्टप्र ...तिवजनियः ८

स्य यं लब्धो रागी सन् हन्यात् तीर्थेषु श्राद्धादिष्वेव त
त्रापि प्रतिदृष्टेषु प्राप्तेष्वेव न नित्यश्राद्धादिषु तत्रापि राजैव मध्यानेव वन एव यावदुपयोगमेवेति
एवं जीवस्य विषयसेवापि यावदुपयोगं नयथेष्टमिति नियम एवेत्यर्थः ६ अतोनावश्यकत्वमित्याह य
एवं नियतं कर्म विद्वान् तेनेत्युपलक्षणं तेनान्येन वा कर्मणा एवमनुतिष्ठते नयज्ज्ञानं भवति तेन ज्ञानेन
हेतुना मोनुष्ठाता नलिप्यते अन्यथानियमोल्लंघनेनांतः करणशुद्ध्यभावात्कर्तृत्वाभिमानरूढः कर्मभिरनु

बध्यते ततस्तद्गुणप्रवाहपतितो भववजति ८

श्री॰ भा॰स्क॰ टी॰ १००
100

शासेसीकं परिसमाप्य पुनर्मृगयामेवानुवर्तयति तत्रेति चित्रावाजाः पत्राणि येषां तैः विप्लवो नाशः क
रुणात्मकृपालूनां दुःसहः ९ १० तदेवं स्वभावस्थादर्शिता इदानीं पुनरपि विवेकवत्वाद्बुद्ध्या रममाणस्य
पुत्रादि संततिप्रपंचं विधास्यन्कथां मैं दर्शयितुं तस्याः प्रणयकुपितायाः अनुनयप्रस्तावसहितमाह तत

तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः विप्लवोभूद्दुःखितानां दुःसहः करुणात्मनां ९
शशान्वराहान्महिषान्गवयान्रुरुशल्यकान् मेध्याननेयांश्च विविधान्विनिघ्नन्श्रममध्यगात्
ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान् कृतस्नानोचिताहारः संविवेश गतक्लमः ११ आ
त्मानमर्हयांचक्रे धूपालेपस्रगादिभिः साध्वलंकृतसर्वांगो महिष्यामादधे मनः १२ तृप्तो हृ
ष्टः सुदृप्तश्च कन्दर्पाकृष्टमानसः न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनी १३ अंतःपुरस्त्रियो
पृच्छद्विमना इव वेदिषत् अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा नतथैतर्हि रोचते गृहेषु गृ

हेत्यारभ्य यावदध्यायसमाप्तिः आईयिवान् आगतः कृतं स्नानमुचितआहारश्च येन संविवेश शय्यामाश्रि
तः ११ १२ गृहमेधिनीं सात्विकीं बुद्धिं राजसत्वात् बुद्ध्या वर्तमानो नापश्यत् १३ वेदिषत् हे प्राचीनबर्हिः अं
तः पुरस्त्रियः तत्सखीः सेश्वरीणां स्वामिनीसंहितानां यथा पुरेत्यादि एष्य गवाक्यं १४

१००

100A

व्यंगेचक्रादिहीने १५ १६ निरवस्तारेआस्तरणरहिते १७ अवधूतांमलदेहादरांतत्संगेनोन्मथितंव्याकु
लंज्ञानंयस्य १८ प्रेमसंरंभः प्रणयकोपस्तस्यलिंगंकुटिलदृष्ट्यादिस्वस्मिन्नलब्धवान् १९ उत्संगमारो

यदिनस्याद्गृहेमातापत्नीवापतिदेवता व्यंगेरथइवप्राज्ञःकोनामासीतदीनवत् १५ क्ववर्त
तेसाललनामज्जंतंव्यसनार्णवे यामामुद्धरतेप्रज्ञांदीपयंतीपदेपदे १६ रामाऊचुः नरनाथ नारदउवाच
नजानीमःत्वत्प्रियायद्व्यवस्यति भूतलेनिरवस्तारेशयानांपश्यशत्रुहन् १७ पुरंजनःस्व
महिषींनिरीक्ष्यावधुतांभुवि तत्संगोन्मथितज्ञानोवैक्लव्यंपरमंययौ १८ सांत्वयन्श्लक्ष्णया
वाचाहृदयेनविदूयता प्रेयस्याःप्रेमसंरंभलिंगमात्मनिनाभ्यगात् १९ अनुनिन्येथश
नकैर्वीरोनुनयकोविदः पस्पर्शपादयुगलमाहचोत्संगलालितां २० नूनंत्वकृतपुण्यास्ते पुरंजनउवाच
भृत्यायेष्वीश्वराःशुभे कृतागःस्वात्मसात्कृत्वाशिक्षादंडंनयुंजते २१

पलालितं २० कृतमागः अपराधोयैस्तेषु आत्मसात्कृत्वा अस्मदधीनोयमितिमत्वाशिक्षार्थंदंडंन
कुर्वंतितेभृत्यामंदभाग्याः २१

श्री॰ यतः परमोनुग्रहोदंडोयस्त्वदंडितोविषीदति सोत्तरत्याह वालइति वंधुकृतंशिलाकरणाग्रमर्षणः
भा॰च॰ क्रोधी २२ हेसदिति हेसभ्रु हेमनस्विनि सात्वमस्माकंस्वामिनि अतः स्वानांमुखंप्रदर्शय कीदृशं
टी॰ अनुरागभरेणव्रीडयाचयोविलंवः मन्थरतातेनविलसन्हसितावलोकोयस्मिन् नीलाअलकाय

१०१

101

परमोनुग्रहोदंडोभृत्येषुप्रभुणार्पितः वालोनवेदतत्तन्वि वंधुकृतममर्षणः २२ सात्वंमु
खंसदतिसभ्रु नुरागभारव्रीडाविलंवविलसद्धसितावलोकं नीलालकालिभिरुपस्कृ
तमुन्नसंनः स्वानांप्रदर्शयमनस्विनिवल्गुवाक्यं तस्मिन्वधेदममहंतववीरपत्नियोन्यत्र
भूसुरकुलात्कृतकिल्विषस्तं पश्येनवीतभयमुन्मुदितंत्रिलोक्यामन्यत्रवैमुररिपोरित
रत्रदासात् २४

वालयैसैरुपस्कृतंभूषितं उन्नतनासिकंवल्गुवाक्यंयस्मिंस्तत् २३ हेवीर
वीर॰ पत्निस्सममभार्ये यस्त्वंकृताअपराधः तस्मिन्नहंब्राह्मणकुलादन्यत्रान्यस्मिन् मुररिपुदासादितरत्र
च दमंदधेदंडंकरोमि किंतु तंविगतभयमुच्चैर्मुदितं त्रिलोक्यामन्यत्रवैलोकत्रयाद्वहिरपिन १०१
पश्यामि मद्भयादेवासौमरिष्यतीत्यर्थः २४

101A

तेवक्रमितः पूर्वंकदाचिदपिवितिलकं संरंभेणकोपावेशेनभीमंभयंकरं अविमृष्टमनुज्वलंअपे
तरागंस्वैरस्यरूपं तथातेमुजातौशोभमानावपि शोकास्रुभिरूपहतौनपश्यामि तथाबिंबफलाकारम
धरंच विगतःकुंकुमपंकतुल्यः ताम्बूलरागोयस्मात् तादृशंनपश्यामीदानींकृतपूर्वंजातमितिशेषः
यावंतरेयवं मुखंमुस्तौचपश्यन् सुखंविदामित्यन्वयः विगतःकुंकुमपंकरागोयाभ्यामितिस्तनयो

वक्त्रंनतेवितिलकंमलिनंविहर्षंसंरंभभीममविमृष्टमपेतरागं पश्येस्तनावपिशुचोपहतौ
सुजातौविंबाधरंविगतकुंकुमपंकरागं २८ तन्मेप्रसीदसुहृदःकृतकिल्बिषस्यस्वैरंगत
स्यसुगयाव्यसनातुरस्य कादेवरंवशगतंकुसुमास्त्रवेगविस्रस्तपौंस्नमुशतीनभजेतकृ
त्ये २९ इतिचतुर्थेषड्विंशः २६

विशेषणं २८ तत्तस्मात्कृतंकिल्बिषमपराधोयेनतस्य किल्बिषमेवाह स्वैरंस्वातंत्र्येणतामसहृष्ट्वाम्
गयांगतस्य देवोदेवनंक्रीडरतिददातीतिदेवरः कांतस्तंकामवेगेनविस्रस्तंगते पौंस्नंपौरुषंधै
र्यंयस्यतं उशतीकामयानाकृत्येकर्तुंयोग्येअर्थेकानभजेत २९ इतिचतुर्थेषड्विंशः २६

सप्तविंशेप्रियापुत्रव्यासक्त्याविस्मृतात्मनः कालकन्याद्युपाख्यानैर्जरारोगाद्युदीर्यते १ तदेवंजीवस्या-
नुनयादिकथयासौंदर्येणात्मनमुपाधिवशात्वमज्ञात्वातन्निमित्तंसंसारपरंपरांनिरूपयितुमाह इत्यभि-
ति अत्रचप्रतिपदंकथंचिदध्यात्मपक्षेपिवियोजयितुंशक्यमेव श्रीनारदेनतु जीवस्यस्त्रीपुरुषा-
वासनाद्वारेणाविद्यासंसृतिर्भवत्येतावदेवकथातात्पर्यंनिदर्शितं क्वचित्समान्क्वचिद्वस्त्रीकवि

नारदउ॰ इत्थंपुरंजनंसध्र्यग्वशमानीयविभ्रमैः पुरंजनीमहाराजरेमेरमयतीपतिं १ सराजा
महिषींराजन्सुस्नातांरुचिराननां कृतस्वस्त्ययनांतृप्तामभ्यनंददुपागतां २ तयोपगूढःप-
रिरब्धकंधरोरहोनुमंत्रैरपकृष्टचेतनः नकालरंहोबुबुधेदुरत्ययंदिवानिशेतिप्रमदापरि-

त्रोभयमंथयीः देवोमनुष्यस्तिर्यग्वायथाकर्मगुणंभवतिवदतातत्रादौ पुंस्त्वेनसंसृतिरध्यायत्रयेणो-
क्ता ततस्त्वेकेनाध्यायेनस्त्रीत्वेनसंसृतिप्रदर्श्येश्वरप्रसादलब्धज्ञानेनमोक्षश्चोक्तः तत्रतदेवपद्यायोपयो-
गमेवव्याख्यास्यामः सध्र्यक् सम्यक् विभ्रमैर्विलासैः १ कृतंस्वस्त्ययनंमंगलंकुंकुमसिंदूरादिभिर्यस्या
तां २ उपगूढः परिरब्धः परिरब्धाकंधरातस्यायेन रहस्येकांते अनुमंत्रैरनुकूलैरभाषणैः अपकृ-
ष्टचेतनाविवेकोयस्य कालरंहः आयुर्व्ययं प्रमदैवपरिग्रहोनज्ञानसाधनंयस्य ३

102A

महार्हतल्पे उत्कृष्टशय्यायां शयानः महिष्या भुज उपधिः उपधानमुच्छीर्षकं यस्य प्रविसर्गपाठे शयनक्रि
याविशेषणं तां महिषीमेव परं श्रेष्ठं पुरुषार्थं मन्यतेन तु निजं रूपं वस्तुतत्त्वं तमसाज्ञानेनाभिभूतो यतः ४
५ पुत्रानिंद्रियपरिणामान् इत्यर्थः तदनंतरं तद्वृत्तीः पुत्रसंख्या च वासुदेवमात्रविवक्षया इति संख्या

शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः तामेव वीरो मनुते परं यतः तमोभिभू
तो न निजं परं च यत् ४ तयैवं रममाणस्य कामकश्मलचेतसः क्षणार्धमिव राजेंद्र व्यतिक्रां
तं नवं वयः ५ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः शतान्येकादश विराडायुषोऽर्धमथात्यगा
त् दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ७ स पं
चालपतिः पुत्रान्पितृवंशविवर्धनान् दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ८ पुत्राणां चाभवन्पु
त्रा एकैकस्य शतं शतं यैर्वै पौरंजनो वंशः पंचालेषु समेधितः तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु
निरूढेन ममत्वेन विषयेष्वन्वबध्यत १० ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः देवान्पितॄन्भूतप

त पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौंदर्यार्थं विराट् संराट् आयुषोऽर्धमित्यपि कथासौंदर्यार्थमेव ६ पुरंजनकन्या
त्वात्पौरंजन्यः हे प्रजापते ७ दारैः परिणयानंतरं हिताहितचिंताभिः वरैः उचितविषयभोगैः ८ पुत्राणां पु
त्राः कर्माणि पंचालेषु शब्दादिविषयेषु ९ तेषु पुत्रादिषु तेषामपि ये रिक्थहाराः पुत्रास्तेषु च १०

श्री· भा·च· १·३ 103

पुरकेषु आत्मनि हितेषु कर्मसु अनवहितस्य सर्वे कालः जरासमयः १२ चंडवेगः संवत्सरेणावर्तत मानेनोपल
क्षितः गंधर्वाः दिवसाः १३ तादृशीः तादृशपः मेथुनः दिवसैः मिथुनीभूय स्थिताः सितासिताश्च शुक्लकृष्ण
पक्षीयाः परिभ्रमणेन सर्वैः कामैः सह विनिर्मितां पुरीमपहरंति १४ प्रजागरः प्राणः १५ सप्तसप्तभिः शतै

पुरकेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः आससाद स वै कालो योऽप्रियः प्रिययोषितां १२ चंडवेग इति
ख्यातो गन्धर्वाधिपतिर्नृप गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयं १३ गंधर्व्यस्तादृशीरस्य मैथुन्य
श्च सितासिताः परिवृत्त्या विलुंपंति सर्वकामविनिर्मितां तेचंडवेगानुचराः पुरंजनपुरीं यदा
हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः स सप्तभिः शतैरेको विंशत्या च शतं समाः पुरंजनपुराध्यक्षो
गंधर्वैर्युयुधे बली १९ क्षीयमाणे स्वसंबंधे एकस्मिन् बहुभिर्युधि चिंतां परां जगामार्तः सराष्ट्रपुरबां
धवः ९ सएव पुर्यां मधुभुक्पांचालेषु स्वपार्षदैः उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भयं १८ काल
स्य दुहिता काचित्त्रिलोकीं वरमिच्छती पर्यटंती न बर्हिष्मन् कश्चन नंदत कंचन १९ दौर्भाग्येनात्मनो लो

रेको विंशत्या च सह १८ स्वसंबंधि स्वसंबंधिनि प्राणे ९ सएवम \\ के विश्रुता दुर्भगेति सा याता च पारजस्य
पुरु भुक्तवान् स्व भोक्ता स्वपार्षदैरिंद्रियैः नाविदत नालोचितवान् १८ कालस्य दुहिता जरा न प्रत्यनंदत नैच्छ
त बर्हिष्मन् हे प्राचीनबर्हिः १९ स्वरवेण याति प्रजापतेन वृता सती वरमदात् ययातिः शुक्रशापात्ता तां प्राप्य पुत्रा

103A

प्रत्याख्यातवतिमयिसंरंभं क्रोधं कृत्वा नैकत्रस्थातुमर्हसीति शापमदात् २२ अथयोप्याथयस्य
यवनास्तेषामीश्वरभयनामानं बवे २३ देवीरत्वामीप्सितं हृत्वा नरिष्यतिनन्नश्यति २४ लोकतोवे
कदाचिद्दटमानामाव्रह्मलोकान्महींगतं वव्रेहृद्वृतंमां तजानंतीकाममोहिता २१ मयि
संरंभविपुलमदाच्छापंसदुःसहं स्थातुमर्हसिनैकत्रमयाज्ञाविमुखोमने २२ ततोविद्वि
तसंकल्पाकन्यकायवनेश्वरं मयोपदिष्टमासाद्यवव्रेनाम्नाभयंपतिं २३ अथभयंयवनानां
त्वांहृत्वावीरेप्सितंपतिं संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति २४ द्वाविमावनुशो
चंतिवालावसदवग्रहौ यल्लोकशास्त्रोपनतंनरातिनतदिच्छति २५ अथोभजस्वमांभद्र
भजंतीमेदयांकुरु एतावान्पौरुषोधर्मोयदार्त्ताननुकंपते २६ कालकन्योदितवचोनिश
म्ययवनेश्वरः चिकीर्षुर्देवगुह्यंसस्मितंतामभाष
एतस्य यरीयत्नेनयास्यतेनच उपनतं
प्राप्तंतयाच्यमानंयोनददाति यश्चदीयमानंनेच्छतिनगृह्णाति इमौद्वावकर्मभूतौवनुशोचंतिसंतः
२५ पुरुषेणैवकर्तव्योधर्मःपौरुषः २६ देवगुह्यंमरणं तद्विप्राणिनांवैराग्यपात्रदयायदेवैर्गोप्यते

श्री· भा·च· टी· १०४

104

तद्भयं तव आत्मसमाधिना ज्ञानदृष्ट्या याच्यमानो यं लोकस्त्वां नेच्छति २८ अतोव्यक्तगतिः ज्ञातप्राप्ते
सत्यलक्षितगतिः सती लोकमाक्रम्य भुंक्ष्व एवं सर्वोपि लोकः तव पतिः स्यादित्यर्थः नचैवं त्वया शंक
नीयं मां प्रतिहत्य लोको दहनिष्यतीति यस्मात् त्वमेव प्रज्ञानाशं करिष्यसीत्याह याहीति यामदीयाय व
नएतेन नात याप्युक्ता २९ किंच प्रज्वार इति मारको वैस वोज्वरः प्रज्वारः माहेश्वरस्य वाध्यंतः पातित्वात्

मया निरूपितस्तभ्यं पतिरात्मसमाधिना नाभिनंदति लोकोयं त्वामभद्रामसम्मतां २८ त्व
मव्यक्तगतिर्भुंक्ष्व लोकं कर्मविनिर्मितं याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि २९ प्रज्वारो
यं मम भ्राता त्वं च मे भगिनी भव चराम्युभाभ्यां लोकेस्मिन्नव्यक्तो भीमसैनिकः ३० इति चतुर्थे स्कं
पुरंजनोपाख्याने सप्तविंशः २७ नारदः सैनिका भयनाम्नो ये बर्हिष्मन्दिष्टकारिणः प्रज्वार
कालकन्याभ्यां विचेरुरवनी
भीमाः घोराः सैनिकाः यस्य ३० इति चतुर्थे सप्तविंशः २७ अष्टाविंशे तु वै
दृष्टांताख्यानेन स्त्रीविचिंतया स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते इदानीं पुरंजनस्य पृदेहत्यागप्रका
रं सर्वं कस्त्रीत्वप्रकारमाह सैनिका इत्यादि राजसिंहस्य वेषमनीत्यं तेन दिष्टैर्दैवं ऊर्वंतीति तथा मृत्योरा

देवकाशिकादिव १

१०४

104A

जरत्पन्नगेन जीर्णप्राणेन पालितां २३ द्वार्भिश्चक्षुरादिभिः रोगरूपेण प्रविश्य ४ ५ कन्यया जरयोप-
गूढः सन् तत्प्रतिक्रियां न लेभे इति तृतीयेनान्वयः हृतैश्वर्यं उत्थानादिस्वशक्तिः ६ प्रतिकूलान
पेक्षितविषयाप्रापणात् अनादृतान् आदरमकुर्वाणान् स्वाधीनताभावात् अनुगा इंद्रियाणि अमा

तएकदा तु रभसा पुरंजनपुरीं नृप रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालितां २ कालकन्यापि बुभु
जे पुरंजनपुरं बलात् ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ३ तयोपभुज्यमानां वै यव
नाः सर्वतो दिशं द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीं ४ तस्यां प्रपीड्यमानायामभिमानी पुरं
जनः अवापोरुविधांस्तापान् कुटुंबी ममताकुलः कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः न
ष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ६ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् पुत्रान्पौत्रानु
गामात्यान् जायां च गतसौहृदां ७ आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् दुरंतचिंतामापन्नो न
लेभे तत्प्रतिक्रियां कामानभिलषन् दीनो यातयामांश्च कन्यया विगतात्मगतिस्नेहः पुत्रदारांश्च ला

त्या इंद्रियदेवाः गतसौहृदामध्यवसायाभावात् ७ अरिभिर्विघ्नादिभिर्दूषितान् ८ कालकन्ययादत्तभुक्त
या यातयामान् निःसारानपि कामान् विगता आत्मनो गतिः पारलौकिकी ऐहिकः पुत्रादिस्नेहश्च यस्य सः

श्री० सराजापुरंजनः हातेप्रचक्रमेउपक्रांतवानितिद्वयोरन्वयः अनिकामतः अनिच्छयापि १०॥ सपरिच्छे
भा०च० दः भृत्यवर्गसहितः ऊटुंबेनदीव्यतीति कौटुंबिकः ऊटुंबिन्यांसधिः नविवत्ततः सान्वयः पुत्रादिस
टी० गंधर्वयवनाक्रांतांकालकन्योपमर्दितां हातेप्रचक्रमेराजातांपुरीमनिकामतः १० भयनाम्नो
१०५ प्रजेोभ्राताप्रज्वरःप्रसुपस्थितः ददाहतांपुरीकृत्स्नांभ्रातःप्रियचिकीर्षया ११ तस्यांसंदह्यमाना
105 यांसपौरःसपरिच्छदः कौटुंबिकःऊटुंबिन्याउपातप्यतसान्वय १२ यवनोपरुद्धायतनोग्रस्ता
यांकालकन्यया पुर्यांप्रज्वरसंसृष्टःपुरपालोन्वतप्यत १३ नशेकेसोवितुंतत्रपुरुकृच्छ्रोरुवेपथुः
गंतुमैच्छत्ततोवृक्षकोटरादिवसानलात् शिथिलावयवोयर्हिगंधर्वैर्हृतपौरुषः यवनैररिभीरा
जन्नुपरुद्धोरुरोदह १५ दुहितृःपुत्रपौत्रांश्चजामिजामातृपार्षदान् स्वत्वावशिष्टंयत्किंचिद्गृहको
शपरिच्छदं अहंममेतिस्वीकृत्यगृहेषुकुमतिर्दृढी दध्यौप्रमदयादीनोविप्रयोगउपस्थिते १० लो
कांतरंगतवतिमय्यनाथाऊटंविनो वर्तिष्यतेकथंत्वेकावालकाननुशोचती १८
हितः यवनैरुपरुद्धान्यायतनानियस्यसपुरपालःप्राणः १३ पुरुवरुकृच्छ्रंतेनउरुर्वेपथुर्यस्य सानलाद्वृ
तकोटरादिवसर्पः १४ कंठेउपरुद्धोरुरोदवुरुहुंधनिंचकार १५ दुहित्रादीनध्यायिसहतरेणान्वयः जा

मयोस्नुषाः स्तसमोऽत्राविशिष्टं भोगस्प्रकोपवद्गीताः २५ १७ १८

105A

ध्यानमेवाह अनाशितेश्रमोज्झिते भर्त्सिते भर्त्सनेकृते यतवाग्भवति १९ अविज्ञमविवेकिनेमां बुधि
तेदेशांतरगते शृहमेधीयंवत्सशृहस्थमेमपिकिंनेष्यतिअनुवर्तयिष्यति युक्तमेतत् यतोवीरसूः पुत्र
वती किंच मद्विरहमसहमानापिगमिष्यतेवेत्यर्थः २० नविद्यतेपरमयनमाश्रयोयेषांतेअपरायणाः
नमप्यनाशितेभुंक्तेनास्नातेस्नातिमत्परा मयिकृष्टेसुसंत्रस्ता भर्त्सितेयतवाग्भयात् १९ प्रवो
पयतिमाविज्ञंबुधितेशोककर्शिता वत्सैतद्गृहमेधीयंवीरसूरपिनेष्यति २० कथंतद्दारका
हीनादारिकाश्चापरायणाः वर्तिष्यतेमयियातेभिन्ननावइवोदधौ २१ एवंकृपणयाबुद्ध्याशो
चंतमतदर्हणं ग्रहीतुंकृततीरेनभवनामाभ्यपद्यत २२ पशुवद्यवनैरेषनीयमानःस्वकंत्त
यं अन्वद्रवन्ननुपथ्याः शोचंतोभृशमातुराः पुरींविद्रापोपगतउपरुद्धोभुजंगमः यदातमे
वानुपुरींविशीर्णांप्रकृतिंगता २४ विकृष्यमाणःप्रसभंयवनेनबलीयसा नाविंदत्तमसा
विष्टःसखायंसुहृदंपुरः तेयत्नपशवोनेनसंज्ञमायेदयालुना ऊठारैश्छिन्नच्छिडःअहःस्मरं
पुत्राःकन्याश्चयद्वा पराश्रयाःकन्याःभिन्नानौर्योषो २१ अतदर्हणंवस्ततस्तस्यअस्नत्वात् २२ एष यदात्तय
स्थानं नीयमानस्तदा अनुपथ्याः प्राणाइंद्रियाणिच तथाचश्रुतिः तमनुक्रामंतप्राणोनुक्रामतिप्राणमनु
क्रामंतंसर्वेप्राणाअनुक्रामंतीति २३ प्रकृतिंमहाभूतात्मतां २४ नाविंदत्तमसस्मारपुरःसर्वंसखायंसंतमीश्वरं

तोभिविमस्पृतत २९

२५ अरुद्यानूनाकाम्यकर्मत्रयेसंसमाः हताः अमीवंश्यपंकोर्येता २९

श्री॰
भा॰च॰
टी॰
१०६
106

शाश्वतीः समाः बहून्संवत्सरान् आर्तिमनुभूय २७ अंतकाले तां भार्यामेव मनसा रूढेन स्मरन् अनंत
रं विदर्भस्य वेश्मनि प्रमदोत्तमा बभूव अतः परस्मिन्नकारणापतावदेव प्रकृतोपयोगि विवक्षितं स्त्री॰
ध्यानेन स्त्रीत्वप्राप्तावपि पतिव्रताध्यानेन पूर्वादृष्टेन च धार्मिकाद्विदर्भाज्जन्माभूत् धार्मिकसंगेन वि
शुद्धस्य भागवतेन मलयध्वजेन संगोभूत् ततो विष्णुभक्तिः ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्र

अनंतपारे तमसि मग्नो नष्टस्मृतिः समाः शाश्वतीरनुभूयार्तिं प्रमदासंगदूषितः २७ तामे
व मनसा गृह्णन्बभूव प्रमदोत्तमा अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि २८ उपयेमे वी
र्यपणां वैदर्भीं मलयध्वजः युधि निर्जित्य राजन्यान्पाण्ड्यः परपुरंजयः २९

तद्धर्मेण भजतो भगवत्प्रसादाल्लब्धज्ञानेन मोक्ष इति अन्यत्तु कथालंकारमात्रं तथापि किंचित्किं
विहृतिसाम्येनेह योजयिष्यामः विदर्भस्य विशिष्टदर्भोपलक्षितस्य कर्मठस्य राजसिंहस्य धर्मे
णादिप्रजापालनेन यज्ञादिना च तद्विधा राजते तेषु श्रेष्ठस्य वेश्मनि २८ मलयोपलक्षिते दक्षिण
देशे ध्वज इव दर्शनीयः सद्धि श्रीविष्णुभक्तिप्रधानो देशः तत्र मुख्यः महाभागवत इत्यर्थः पाण्ड्य
पक्वानिश्चयबुद्धिः तामर्हतीति पाण्ड्यः स उपयेमे पुरंजनो भागवतसंगं प्राप्त इत्यर्थः २९ १०६

106A

आत्मजांश्रीकृष्णसेवारुचिं तत्संगेनभगवद्धर्मेरुचिरभूदित्यर्थः असितस्यश्रीकृष्णस्येक्षणंयस्यास्तां यवीयसःसप्त
सुतान् श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंइतिभक्तिप्रकारान् सख्यात्मनिवेदनयोस्तु
पराधीनत्वान्नोत्तरकालत्वात्तस्यभगवतैवोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुक्तत्वेः सप्तैतत्कं श्रीभगवद्धर्मेरु
च्यातच्छ्रवणकीर्तनादिकंजातमित्यर्थः द्रविडभूमिपालकान् द्रविडभूमिर्हि श्रवणादिभक्तिरेवसर्वहिता
लीलितिप्रसिद्धं ३० अर्बुदमितिश्रवणादीनांप्रत्येकमनेकप्रकाराश्चभवन्नित्यर्थः तदुक्तंभक्तियोगोबहुविधो
मार्गैर्भामिनिभाव्यतइतियेषांवंशधरैः यतःप्रवृत्तेः संप्रदायभेदैःकृत्स्नामहीमन्वंतरंततःपरंचभोक्ष्यते अ

तस्यांसजनयांचक्रआत्मजामसितेक्षणां यवीयसःसप्तसुतान्सप्तद्रविडभूभृतः ३०
एकैकस्याभवत्तेषांराजन्नर्बुदमर्बुदं भोक्ष्यंतेयद्वंशधरैर्महीमन्वंतरंपरम् ३१ अ
गस्त्यःप्रागदुहितरमुपयेमेधृतव्रतां यस्यांदृढच्युतोजातइध्मवाहात्मजोमुनिः ३२

विद्याकामकर्मभ्योरत्तिष्यते ३१ अगस्त्यःअंगानिनिष्क्रियाणिगात्राणिस्त्यायतिसंघातयतीत्यगस्त्योमनःप्रा
क्प्रथमजांदुहितरंकृष्णसेवारुचिमुपयेमेतस्यामनःकृष्णेदृढोरतिर्बबन्धेत्यर्थः धृतानिशमदमादीनिव्रतानि
ययातांरतिं दृढेभ्यःसत्यलोकादिभोगेभ्योपिच्युतस्तद्वद्भिः कृष्णरतावेहामुत्रभोगविरागोजातइत्यर्थः
सर्वोपशमात्मकत्वान्मुनिःकथंभूतः इध्मवाहात्मजोयस्यसः तद्विज्ञानार्थम् सगुरुमेवाभिगच्छेत्समित्पा
णिः श्रोत्रियंब्रह्मनिष्ठंइत्यादिश्रुतिप्रसिद्धा समिद्वहनोपलक्षिता गुरूपसत्तिर्विरागादित्यर्थः नत्वविरक्तस्य

गुरूपसत्तिः संभवति कथमित्यपेक्षायामाह श्रुतमेव ३२

श्री॰ भा॰ च॰ टी॰ १०७

107

क्ष्मांविभज्य तत्रश्रवणादिभक्तिभेदंव्यवस्थाप्य ३३ इदानींपुरंजनस्यस्त्रीभावंप्राप्तस्यसर्वतोविर
क्तस्यपतिरेवगुरुः स्त्रीणामितिवचनात्पतिसेवयागुरुशुश्रूषाप्रकारंदर्शयितुमाह हित्वेत्यादिम
नोहरत्वेतेनग्रद्येण मदयतीतिमदिरेक्षणायस्य ३४ तत्रचंद्रवसाद्यानद्यः तासांपुण्यैःसलि
लैः उभयत्रांतर्वहिश्चात्मनोमलंक्षालयन् तपआस्थितइत्युत्तरेणान्वयः ३५ अस्यतेभूमौक्षिप्यत

विभज्यतनयेभ्यः क्ष्मांराजर्षिर्मलयध्वजः आरिराधयिषुः कृष्णंसजगामकुलाचलं ३३ हि
त्वागृहान्सुतान्भोगान्वैदर्भीमदिरेक्षणा अन्वधावतपाड्येशंज्योत्स्नेवरजनीकरं ३४ तत्रचं
सा द्रवसानामताम्रपर्णीवटोदका तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनोमृजन् कंदाष्टिभिर्मूल
फलैः पुष्पपर्णैस्तृणोदकैः वर्तमानःशनैर्गात्रकर्षणंतपआस्थितः ३६ शीतोष्णवातवर्षा
णिक्षुत्पिपासेप्रियाप्रिये सुखदुःखेइतिद्वंद्वान्यजयत्समदर्शनः ३७ तपसाविद्ययापक्वकषा
योनियमैर्यमैः युयुजेब्रह्मण्यात्मानंविजिताक्षानिलाशयः ३८

इति अष्टिःवीजं ३६ ३७ विद्ययाउपासनयापक्वकषायः दग्धकामादिवासनः युयुजेआत्मनोब्रह्म
ताभावयामास अक्षाणींद्रियाणिअनिलः प्राणःआशयश्चित्तंविजिताअक्षादयोयेन ३८

107A

आस्ते स वर्षशतमिति ज्ञानस्य दृढः साधनतां दर्शयति अतः भक्तिं कृतवानिति आह वामदेवे इति गुरु
दृष्ट्वा अन्यद्देहादिकं न वेद ३९ स एवं वर्तमानः आत्मन्यात्मानं विद्वान् अन्यस्मादुपरराम कथं विद्वान्
व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेन कुतः व्यापकतया देहादिप्रकाशकत्वेन ननु देहाद्याकारो विमर्श
एव यत्प्रकाशयति न तु निराकार आत्मा तत्राह आमर्शस्यापि साक्षिणं अयं भावः विमर्शो नामान्तःक
रणवृत्तिः सा च जडत्वादात्मप्रकाश्यैव चेति यथा स्वप्ने ममेदं शिरश्छिन्नमित्यादिप्रतीतेस्तद्व्यतिरिक्तमा

आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः वामदेवे भगवति नान्यद्देहाद्दृष्टवानिति ३९
स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि विद्वान्स्वयमामर्शसाक्षिणं विरराम ह ४०
साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखे ४१ प
रे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि ईक्षमाणो विहायेक्षामस्मादुपरराम ह ४२

त्मानं वेदेति तद्वत् ४० केन विद्वांस्तत्राह साक्षादिति वयोगुरुस्तेनोक्तेन सर्वतोमुखं यथा तथा स्फुरता अन
वच्छिन्नेन ज्ञानेन ४१ तदेवाह परे इति ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मन ईक्षणे शोकादिनिवृत्तिः अह
मेव ब्रह्मेतीक्षणे ब्रह्मणः परोक्षत्वनिवृत्तिः अतो व्यतिहारेणेक्षमाणः अस्मात्संसारादुपरराम नन्वेवमपि
जीवस्य कुतो ब्रह्मत्वापत्तिः ईक्षणस्यैव व्यवधायकत्वादित्याशंक्याह ईक्षां विहाय दग्धेन्धनानलवत्तस्याः स्व

यमेवोपशान्तिरिति भावः ४२

ब्रह्मण्यात्मनि

वृद्धि

श्री· भा·च· टी· १०८ 108

४२ उपपतिंपत्युःसमीपे यद्वा पत्युःकिंचिन्मात्रेणन्यूनातत्समानासतीबभावित्यर्थः उपोधिकेचेति
कर्मप्रवचनीयः तद्योगेचद्वितीया शांतमंगारावस्थमनलेउपशांताग्रद्धाज्वालायथाभवतिनहत
तदानीमपिसुस्थिरमासनंयस्यातपवाज्ञानुनीयदातदायथाएवंमसेवत ४५ यत्संज्ञिमर्चयंतीयदा ४४
पतिंपरमधर्मज्ञंवैदर्भीमलयध्वजं प्रेम्णापर्यचरद्धित्वाभोगान्सापतिदेवता ४३
चीरवासाव्रतक्षामावेणीभूतशिरोरुहा बभावुपपतिंशांताशिखाशांतमिवानलं
अजानतीप्रियतमंयदोपरतमंगना सुस्थिरासनमासाद्ययथाएवमुपाचरत् ४५
यदानोपलभेतांघ्रावूष्माणंपत्युरर्चती आसीत्संविग्नहृदयायूथभ्रष्टामृगीयथा ४६
आत्मानंशोचतीदीनमबन्धुर्विक्लवाश्रुभिः स्तनावासिच्यविपिनेसुस्वरंप्ररुरोदसा ४७
उत्तिष्ठोत्तिष्ठराजर्षइमामुदधिमेखलां दस्युभ्यःक्षत्रबंधुभ्योबिभ्यतींपातुमर्हसि ४८
एवंविलपतीबालाविपिनेनुगतापतिं पतितापादयोर्भर्तूरुदत्यस्रूण्यवर्तयत् ४९
चितांदारुमयींचित्वातस्यापत्युःकलेवरं आदीप्यचानुमरणेविलपंतीमनोदधे ५०
तस्मिंनंब्राह्मणेनापश्यत् संविग्नहृदयाभयचकिता ४८ आबंधुपतिरहितंअस्रुभिरासिच्य ४७ क्ष १०८
त्रबंधुभ्यःअधार्मिकत्वात्त्रियोम्योपि ४८ आवर्तयत्प्रवर्तयामास चितांविभाय अग्निदानेनादीप्यच ५०

108A

पूर्वंतरः अनादिरीश्वरः सखा हंसस्तयोर्गोविंतिस्कृतेः साम्नाप्रियवाक्येनसंबोधयन् ५१ यस्यत्वंशोचसि अत्रेमसृष्टेःपूर्वंविचवर्थमयिस्थितत्वेनसख्यंसखमनुभूतवानसि ५२ ननुभगवानाहमावयोः सख्यंस ह्रचरत्वंचजानासीतिचेत्तत्राह हेसखेपरमानंदस्वरूपंहित्वाभौमभोगरतः स्थानंमनुष्यशरीरंभोगलेपदो गतवति विह्नकथनेनस्मारयति यद्यपिमांनजानासि तथाप्यात्मानंत्वामविज्ञातः कश्चिन्मेसखाअ

तत्रपूर्वंतरः कश्चित्सखाब्राह्मणअात्मवान् सांत्वयन्वल्गुनासाम्नातामाहरुदतीप्रभो ५१ कात्वंकस्यासिकोवायंशयानोयस्यशोचसि जानासिकिंसखायंमायेनाग्रेविचचर्थह ५२ अपि स्मरसिचात्मानमविज्ञातसखंसखे हित्वामांपदमन्विछन्भौमभोगरतोगतः हंसावहंचत्वंचार्य सखायौमानसायनौ अभूतामंतरावौकः सहस्रपरिवत्सरान् ५४ सत्वंविहायमांबंधोगतोग्रा म्यमतिर्महीं विचरन्पुरमद्राक्षीः कयाचिन्निर्मितंस्त्रिया ५५ सीदित्येवंकिंस्मरसि सखइतिपुंस्त्व निर्देशः प्राक्तनपुंस्त्वस्मरणायसख्यंस्मारयन्स्वावियोगकृतमनर्थमाह हित्वेतिसार्द्धैः षड्भिः पदंस्थानं ५३ हंसौशुद्धौपतिणौच मानसेहृदयंसरश्चायनंययोः कथापत्तेमानससरसिस्थौपतिणौवृत्तांजातौ ऊौ कं गृहं अंतरावितिनैव वासाहपवार्षे सहस्रपरिवत्सरान्महाप्रलयंयावत् हेबंधोग्राम्येसखेमतिर्यस्यस्त्वि

२७

श्री॰ भा॰ च॰ टी॰ १०९
109

पंचेंद्रियाण्यारामा उपवनानि यस्मिन् नवद्वाराणि देहे प्राणच्छिद्राणि यस्मिन् एकः प्राणः पालो यस्मि
न् त्रीणि पृथिव्यप्तेजांसि कोष्ठानि प्राकारा यस्मिन् षट् ज्ञानेंद्रियमनांसि कुलानि अभीष्टविषयसमर्प
कानि वणिजो यस्मिन् पंचविपणा द्रदाः कर्मेंद्रियाणि यस्मिन् पंचभूतानि प्रकृतिरुपादानकारणं यस्य स्त्री
बुद्धिरेव यथा वः पतिः स्वामी यस्मिन् ५५ स्वयमेवेमं श्लोकं व्याचष्टे पंचेंद्रियार्था इति षट्कुलमिति षट्त्वं च प

पंचारामं नवद्वारमेकपालं त्रिकोष्ठकं षट्कुलं पंचविपणं पंचप्रकृतिस्त्रीधवं ५६ पंचेंद्रियार्था
आरामा द्वारः प्राणा नव प्रभो तेजोबन्नानि कोष्ठानि कुलमिंद्रियसंग्रहः विपणस्तु क्रियाशक्ति
भूतप्रकृतिरव्यया शक्त्यधीशः पुमानत्र प्रविष्टो नावबुध्यते ५७ तस्मिंस्त्वं रमया स्पृष्टो रममाणो
श्रुतस्मृतिः तत्संगादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ५८ न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव
न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया मायात्वेषा मया सृष्टा यत्पुमांसं स्त्रियं सती मन्यसे नोभयं यद्वै

कपालमिति च स्पष्टत्वान्न व्याख्यातं ५६ भूतान्येवाव्यया प्रकृतिरुपादानं तस्य स्त्री धवमित्यस्य व्याख्यानं शक्तिर
धीशो यस्य तद्वशः स त्वित्यर्थः ५७ स्पृष्टः अभिभूतः अतो न विद्यते श्रुते ब्रह्मतत्वे स्मृतिर्यस्य ५८ तत्र युपदिशति
न त्वमिति चतुर्भिः सुहृत्पतिः नवद्वारे पुरे यया रुद्धोसि तस्याः ५९ पुमांसं पूर्वजन्मनि यद्दमनप्याः इदानीं च
सतीं स्त्रियं सियन्मन्यसे एषा माया यतः उभयमपि वस्तुतो नास्ति यस्मादावां हंसौ शुद्धौ नौ आवयोर्वत्स माणं

१०९

109A

तत्त्वंपदार्थयोश्चिदंशेनैक्यमाह अहमेवभवान् उपचारंवारयति नचान्यइति व्यतिहारोपदेशः उक्ताभि
प्रायः छिद्रमंतरं ६२ तर्हिकथमावयोरज्ञत्वसर्वज्ञत्वादिधर्मभेदस्तत्राह यथेति आत्मानंदेहमादर्शेनिर्म
लेमहत्तांतस्थिरंचावेक्षेत परस्यचक्षुषिचतद्विपरीतं विद्याविद्योपाधिकृतोधर्मभेदइत्यर्थः तद्व्यभिचारेणईश्व

अहंभवान्नचान्यस्त्वंत्वमेवाहंविचक्ष्वभो ननौपश्यंतिकवयः छिद्रंजातुमनागपि ६२ यथापु
रुषआत्मानमेकमादर्शचक्षुषोः द्विधाभूतमवेक्षेततथैवांतरमावयोः ६३ एवंसमानसोहंसो
हंसेनप्रतिबोधितः स्वस्थस्तद्व्यभिचारेणनष्टामापपुनःस्मृतिं ६४ बर्हिष्मन्नेतदध्यात्मंपारोक्ष्येण
प्रदर्शितं यत्परोक्षप्रियोदेवोभगवान्विश्वभावनः ६५ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे
पुरंजनोपाख्यानेऽष्टाविंशोध्यायः २८ प्राचीनबर्हिः भगवंस्तेवचोस्माभिर्नसम्यगवगम्य
ते कवयस्तद्विजानंतिनवयंकर्ममोहिताः १

रवियोगेन ६४ कथामात्रमितिबुद्धिंवारयति बर्हिष्मन्निति पारोक्ष्येणराजकथामिषेण तत्रहेतुःयद्य
स्मात् ६५ इतिश्रीभावार्थदीपिकायांचतुर्थस्कंधेपुरंजनोपाख्यानेऽष्टाविंश २८ ऊनत्रिंशेपुरोक्तार्थ
व्याख्यानेनोपसंहृतं स्त्रीसंगतोभवस्त्रीशसंगान्मुक्तिरितिस्फुटं १ कवयः अध्यात्मविदः १ ॥ ०

श्री॰ व्यनक्ति लिंपति चेतनी करोतीत्यर्थः यद्वा व्यनक्ति प्रकटयति ततश्च स्वकर्मणा पुरंजनयतीति पुरंजनपदं
भा॰ च॰ व्याख्यातं भवति एकद्व्यादयः पादा यस्य २ अविज्ञातशब्देनाभ्यस्तः व्याहृतः उक्तो यः सर्वेश्वरः अविज्ञातनाम
टी॰ निरुक्तिः यद्यस्मात्तैर्भिर्नामादियोगेन न विज्ञायते ३ तत्र तेषु पुरेषु मध्ये ४ अतिभिः इंद्रियैः ५ पंचवृत्ति
११॰ 110

नारद उ॰ पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं एकद्वित्रिचतुष्पादं बहुपादमपादकं २ यो
विज्ञातारूपतस्तस्य पुरुषस्य सखेश्वरः यन्न विज्ञायते पुंभिर्नामभिर्वा क्रियागुणैः ३ यदा जिघृक्ष
न्पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् नवद्वारं द्विहस्तांघ्रि तत्रामनुत साध्विति ४ बुद्धिं च प्रमदां विद्यान्म
माहमिति यत्कृते यामधिष्ठाय देहेस्मिन्पुमान्भुंक्तेक्षिभिर्गुणान् सखाय इंद्रियगणा ज्ञानं कर्म च
यत्कृतं सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः ८ बृहद्बलं मनो विद्यादुभयेंद्रियनायकं पां
चालाः पंच विषया यन्मध्ये नवखं पुरं ७ अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति द्वे द्वे द्वा
रौ बहिर्याति यस्तदिंद्रियसंयुतः ८

त्वात्पंचशिराः सर्प इव प्राणः ६ एकादश महाभटा दश तैर्नेता एकाद
शो महाभटो नायकः इत्यर्थः सन्दर्पायति बृहद्बलं यस्य तन्मनः नवखानि द्वाराणि यस्य ७ मुखतः सखे ११॰
त्यादेरर्थं संक्षेपेणाह यस्तदिंद्रियसंयुतः सन्नात्मा ताभिर्द्वार्भिर्बहिर्यातीति ८

110A

पुरः पूर्वभागे कृताः ९ नेत्रे इति रूपमिति च खद्योतादीनां व्याख्यानं शेषोनुवादः ईश्वरः पुरंजनः १० नासे
इति व्याख्या अवधुनोतीत्यवधूतो वायुस्तदात्मकेनेच्छ्वासेन सहैकस्थानत्वात् घ्राणेणावधूतः आस्यमिति व्या

अक्षिणी नासिके आस्यमिति पंच पुरः कृताः दक्षिणा दक्षिणः कर्णोनुत्तरो चोत्तरः स्मृतः पश्चिमे
इत्यधो द्वारौ गुदं शिश्नमिहोच्यते ९ खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते रूपं विभ्राजितं ताभ्यां
विचष्टे चक्षुषेश्वरः १० नलिनी नालिनी नासे गन्धः सौरभ उच्यते घ्राणोवधूतो मुख्यास्यं विप
णो वाग्रसवित् रसः आपणो व्यवहारोत्र चित्रमन्धो बहूदनं पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृ
तः १२ प्रवृत्तं च निवृत्तं च शास्त्रं पांचालसंज्ञितं पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् १३
आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते १४
वैशसं नरकं पायुर्लुब्धकोंधौ तु मे शृणु हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च १५

ख्या रसज्ञ विपणान्वित इत्यत्र रसज्ञ शब्द निर्दिष्टस्य रसविदित्यनुवादः रस इति व्याख्या रसनेंद्रियमित्यर्थः
विपणो वाग्रसविदित्यनुवादः आर्षत्वान्न दोषः ११ अंधः अन्नं १२ १३ ग्रामकमित्यस्यानुवादः ग्रामिणां र
तिरिति तस्य व्याख्या व्यवाय इति १४ १५

श्री·
भा·च·
टी·
१११

विष्टवीनपदस्यानुवादोविष्टचिरिति तद्गुणैर्मनोगुणैः तमःसत्त्वरजोभिः १६ मद्विषीयद्यदीहे तदस्मादि
वर्ष्यंसंसृत्यात्र यथायथाबुद्धिःस्वमेविक्रियतेजाग्रतिविकरोतिवा इंद्रियाणिपरिणमयति तस्माद्गु
णैरक्तोलिंगआत्मा तथातथातस्यावृत्तीः दर्शनस्पर्शनाद्याःकेवलमुपद्रष्टैवसम्बलादनुकार्यते १७ आ
ख्यगमित्येतद्व्याचष्टे संवत्सरस्यैवाप्रतिहतोरयोवेगः प्रतीतोस्यससंवत्सररयः वत्सतत्स्वगतिःस्वम

अंतःपुरंचहृदयंविश्वचिर्मनउच्यते तत्रमोहंप्रसादंवाहर्षंप्राप्नोतितद्गुणैः १६ यथा
यथाविक्रियतेगुणाक्तोविकरोतिवा तथातथोपद्रष्टात्मातद्वृत्तीरनुकार्यते १७ देहे
न्द्यस्विंद्रियास्वः संवत्सरस्ययोगतिः द्विकर्मचक्रस्त्रिगुणध्वजःपंचासुवंधुरः १८ मा
नोरथिमद्विहिसतोरथनीडोहंकृत्कूवरः पंचेंद्रियार्थप्रक्षेपःसप्तधातुवरूथकः १९

शारीरादेर्बुद्ध्यावेवविहृततत्वेनदेशांतरगत्यभावात् पाठांतरेसंवत्सरवयोगतिः संवत्सरश्चतत्कृतंवयश्च
ताभ्यांगतिर्यस्येति द्वीपमित्यस्यव्याख्यानारदेननकृताद्विचक्रमित्यस्यव्याख्याद्विकर्मचक्रइति त्रिगुण १११
ध्वजइतित्रिवेणपदव्याख्या १८ पंचप्रहरणमित्येतत्व्याचष्टे पंचेंद्रियार्थविक्षेपइति १९

111A पंचेंद्रियैः स्नानाविनोदमिवान्यायेनविषयेसेवाकरोतीतिपंचस्नानाविनोदकृत् अनेनचचारमृगयांतत्रेत्यादि
व्याख्यातं २० परिस्रस्यापरिश्रमणेन २१ भगिनीत्वेनजरयेहेलोकानोत्तयाय २२ चराः संचारिणः भूताना
मुपसर्गेपीडायांआस्रशीघ्रोमृतस्देतः रयोवेगोस्यप्रज्वरस्येतिप्रशस्यव्याख्या पाठांतरेभूतकृतास्त्ररयःअ
नेनचारिभिरूपरुद्धइत्यपिपदंव्याख्यातं द्विविधः प्रीतोमन्तूपेणप्रवेशभेदात् २३ एवंपरोहत्वेनोक्तमर्थ
आकृतिर्विक्रमोवास्योमृगतृस्णाप्रथावति एकादशेंद्रियचमः पंचस्नानाविनोदकृत् २० संवत्सर
श्रएडवेगः कालोयेनोपलक्षितः तस्याहानीहगंधर्वागंधर्व्योरात्रयः स्मृताः हरन्त्यायुःपरिस्रस्याष
ष्टानरशतत्रयं २१ कालकन्याजरासाक्षाल्लोकास्तानाभिनंदति स्वसारंजगृहेमृत्युःक्षयाययवने
श्वरः २२ आधयोव्याधयस्तस्यसैनिकायवनाश्चराः भूतोपसर्गाशुरयःप्रज्वरोद्विविधोज्वरः २३
एवंबहुविधैर्दुःखैर्दैवभूतात्मसंभवैः क्लिश्यमानः शतंवर्षंदेहेदेहीतमोवृतः प्राणेंद्रियमनोध
र्मानात्मन्यध्यस्यनिर्गुणः शेतेकामलवान्ध्यायन्ममाहमितिकर्मकृत् २५
व्याख्यायसर्वकथातात्पर्यमाह एवमित्यादि विश्मक्रमेणोत्यंते आधिदैविकादिभिर्दुःखैःक्लिश्यमानोममाह
मितिदेहे शतंवर्षाणिशेतेवर्ततइतिद्वयोरन्वयः २५ अशनापिपासादीन्प्राणधर्मान् श्रोतृत्वादीनिन्द्रियधर्मा
न् कामादीन्मनोधर्मांश्चनिर्गुणोप्यात्मन्यध्यस्य कामलवान्विषयसुखलेशान्ध्यायन्कर्मकृत् २५

श्री॰
भा॰ च॰
टी॰
११२
112

ततः किमतस्त्राह यदेतिद्वाभ्यां स्वदृक्स्वप्रकाशस्वभावोपि २४ २५ तदेवाह सत्त्वादितिद्वाभ्यांप्रकाशो
भूयिष्ठा येषु दुःखमल्पं कं सुखं तत्फलं येषु क्रियया आयासो येषु तान् लोहितान् तमः शोकोऽल्पकं दो येषु तान्
कृष्णानिति ज्ञेयं २६ नोभयं न पुंसकं यथाकर्मगुणं कर्मगुणावनतिक्रम्य २७ तेषु देववशेन स्व खदुःखे

यदात्मानमविज्ञाय भगवंतं परं गुरुं पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् २६ गुणाभिमा
नी स तदा कर्माणि कुरुते ऽवशः शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते २७ शुक्लात्प्रकाशभू
यिष्ठां लोकानाप्नोति कर्हिचित् दुःखोदर्कान्क्रियायासांस्तमः शोकोत्कटान्क्वचित् २८ क्वचित्त
मान्क्वचित्स्वस्त्री क्वचिन्नोभयमंदधीः देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः २९ क्षुत्परीतो य
था दीनः सारमेयो गृहं गृहं चरन्विन्दति यद्दिष्टं दंडमोदनमेव च ३० तथा कामाशयो जीव उच्च ⌐
ावचपथा भ्रमन् उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ३१ दुःखेष्वेकतरेणापि देवभू
तात्महेतुषु जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ३२

प्राप्नोतीति सदृष्टांतमाह द्वाभ्यां क्षुधा परीतो व्याप्तः सारमेयः श्वा दंडं दंडेन ताडनं ३० कामव्याप्त आशयो य
स्य ३१ ननु तर्हि सुखस्य संभवात् दुःखस्य च प्रतीकारसंभवान्नैकांततो हेयत्वं तत्राह दुःखेष्विति प्रतीका ११२
रस्त्वावज्जातिस्याच्चेत्तस्य प्रतिक्रिया तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो न

112A

प्रतिक्रियाणामपिदुःखरूपत्वादितिसदृष्टांतमाह यथाहीति ३३ दुःखस्यमूलभूतानितुकर्माणिप्रति
क्रियादिकर्मभिर्नैवनिवर्तंतइत्याह नैकांततः अत्यंतस्वाप्नंकेवलंज्ञानरहितं अविद्ययाउपसृतं
प्राप्तं अतोविरोधान्ननिवर्त्यनिवर्तकमितिभावः अत्रदृष्टांतः प्रबोधंविनायथास्वप्नमत्यंतंनप्रतिक
रोतीत्यर्थः ३४ ननुतर्हिअज्ञानविलसितत्वेनसंसृतिहेतोर्देहादेरप्यसत्त्वात्किंतन्निवर्तनप्रयासेनतत्राह

यथाहिपुरुषोभारंशिरसागुरुमुद्वहन् तंस्कंधेनसआधत्तेतथासर्वाप्रतिक्रिया ३३ नैकांततः
प्रतीकारःकर्मणांकर्मकेवलं द्वयंह्यविद्योपसृतंस्वप्नेस्वप्नइवानघ ३४ अर्थेह्यविद्यमा
नेपिसंसृतिर्ननिवर्तते मनसालिंगरूपेणस्वप्नेविचरतोयथा ३५ अथात्मनोर्थभूतस्यय
तोनर्थपरंपरा संसृतिस्तद्व्यवच्छेदोभक्त्यापरमयागुरौ ३६ वासुदेवेभगवतिभक्तियोगः
समाहितः सध्रीचीनेनवैराग्यंज्ञानंचजनयिष्यति ३७

अर्थेहीति लिंगरूपेणउपाधिभूतेन ३५ तदेवंसंसृतिप्रकारमुक्त्वातन्निवृत्तिप्रकारमाह अथेतस्मात्
रूपार्थभूतस्यैवात्मनः यतोऽज्ञानात्मनस्यैवाऽनर्थपरंपरारूपासंसृतिर्भवति तस्यव्यवच्छेदोगुरुरूपे
वासुदेवेभक्त्यैव ३६ ननुसंसृतिर्वैराग्यविवेकाज्ज्ञानादेवनतुभक्त्यातरतिशोकमात्मविदित्यादिश्रुतेस्त
त्राह वासुदेवइति सध्रीचीनेनसमीचीनेनप्रकारेण ३७

स

श्री· नन्वसौमहाफलोभक्तियोगःकथंस्यादतआहसतंच्युतस्यकथामाश्रित्यवर्तमानोचिरात्स्यात् कस्यस्या
भा·च· त्तदाह शृण्वतःअधीयानस्यच ३८ अत्रस्याननदाह येत्रेति भगवतोगुणानुकथनेश्रवणेच व्यग्रंसत्वंचेतो
टी· येषांते ३९ ननुसाधुसंगंविनास्वयमेवहरिचिंतनादिनाभक्तिर्भवेदेवेत्याशंक्याह द्वाभ्यांतस्मिन्स्थानेमहद्भिर्मु
११३ खरिताःकीर्तिताःमधुभिच्चरित्रमेवपीयूषंतदेवशिष्यतइतिशेषोयासां असारांशरहितशुद्धामृतवाहिन्यइत्यर्थः

सोचिरादेवराजर्षेस्यादच्युतकथाश्रयः शृण्वतःश्रद्दधानस्यनित्यदास्यादधीयतः यत्रभागवताराजन्
साधवोविशदाशयाः भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ३९ तस्मिन्महन्मुखरितामधुभिच्चरित्रपी
यूषशेषसरितःपरितःस्रवंति तायेपिबंत्यवितृषोनृपगाढकर्णैःतान्नस्पृशंत्यशनतृड्भयशोकमोहाः
एतैरुपद्रुतोनित्यंजीवलोकःस्वभावजैः नकरोतिहरेर्नूनंकथामृतनिधौरतिं ४१ प्रजापतिपतिःसाक्षा
द्भगवान्गिरिशोमनुः दक्षादयःप्रजाध्यक्षानैष्ठिकाःसनकादयः ४२ मरीचिरत्र्यंगिरसौपुलस्त्यःपुल ४३
अवितृषः अलंबुद्धिशून्याःगाढैःसावधानैःकर्णैःएताःसरिताः हःक्रतुः भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः
पिबंतिसेवंते अशनशब्देनक्षुल्लक्ष्यते अशनादयस्तान्नस्पृशंतिभक्तिरसिकान्नवाधंतइत्यर्थः ४० सत्संगमंतरे
णस्वयमेवकथाचिंतनादावालस्यादिनारसावेशाभावाच्चतृष्णापिपासादिनाभिभूतस्यभक्तिर्नसंभवतीत्या
ह एतैरिति ४१ भगवदनुग्रहमंतरेणकस्यापिनज्ञानसंभवइतिकैमुत्यन्यायेनाहचतुर्भिःप्रजापतिर्ब्रह्मा ४२

अहंनारदोंते येषांते ४३

११३

113

वि

113A वाचांपतयोपितयोविद्यासमाधिरूपायैः पश्यंतोविन्वंतोपिपश्यंतंसर्वसाक्षिणंनपश्यंति ४५ ज्ञातश्चेत्तत
आह शब्दब्रह्मणिवेदेउरुर्विस्तारोयस्य अर्थतोपिपारंयस्यन्ये तस्मिन्वर्तमानाः मंत्राणांलिंगैर्वज्रहस्तत्वादि
गुणगुणैर्विविधदेवताभिधानसामर्थ्यैः परिच्छिन्नमेवेंद्रादिरूपंतत्कर्माग्रहेणभजंतेः परमेश्वरंनविदुः ४५
तर्ह्यन्यः कोनामकर्माग्रहंहित्वापरमेश्वरमेवभजेदतआह यदायमनुगृह्णातीतिअनुग्रहेहेतुः आत्म

अथापिवाचस्पतयस्तपोविद्यासमाधिभिः पश्यंतोपिनपश्यंतिपश्यंतंपरमेश्वरं ४४ शब्दब्रह्मणि
दुष्पारेचरंतउरुविस्तरे मंत्रलिंगैर्व्यवच्छिन्नंभजंतोनविदुःपरं ४५ यदायस्यानुगृह्णातिभगवानात्म
भावितः सजहातिमतिंलोकेवेदेचपरिनिष्ठितां तस्मात्कर्मसुबर्हिष्मन्नज्ञानादर्थकाशिषु मार्थदृष्टिं
कृथाःश्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४७ स्वंलोकंनविदुस्तेवैयत्रदेवोजनार्दनः आहुर्धूम्रधियोवेदंसकर्म

निभावितःसन् सतदालोकेलोकव्यवहारे वेदेचकर्ममार्गेपरिनिष्ठितांमतिंत्यजति ४८ अर्थकाशिषुपरमार्थ
त्वेनप्रकाशमानेषुपुरुषार्थबुद्धिंमाकृथा प्ररोचनायकेवलंश्रोत्रप्रियेषुनस्पृष्टंवस्तुयैः ४७ ननुवेदेनस्वर्गादि
साधनत्वेनोक्तानिकर्माणीतिवेदवादिनोवदंति कथमस्पृष्टवस्तुषुतेषुत्यज्यतेतत्राह हे स्वधियामलिनहृदयः
सकर्मकंकर्मपरंवेदमाहुस्तेअतद्विदः अवेदज्ञाः यतस्तेस्वस्वरूपभूतंलोकमात्मतत्त्ववेदतात्पर्यगोचरंनविदुः

त्वंतमद्दामूर्षित्याह आस्तीर्येति दृहद्वधात् पशुवधात् मानीमहायज्वाहमित्यहंकारी अतः स्तब्धः अविनीतस्त्वकर्मणैवैषि परंविद्यास्वरूपंतच्चनवेत्सिनारदः स्वयंकृपयोपदेशंनिरूपयति हरिंतोषयतीतिहरितोषंयत्तदेवकर्म यया तस्मिन्हरौमतिर्भवतिसैवविद्यामहाफलत्वात् ४९ अतद्रूपेत्नायांहरेः परमफलत्वंवदर्शयन्नाहहाभ्यां हरिर्देहभृतामात्माईश्वरश्च नत्वहेतुः स्वयंस्वातंत्र्येणप्रकृतिःकरणे अतस्तेषांतत्पादमूलमे

आस्तीर्यदर्भैःप्रागग्रैःकार्त्स्न्येनक्षितिमंडलं स्तब्धोबृहद्वधान्मानीकर्मणावैषियत्परं ४९ तत्कर्महरितोषंयत्साविद्यातन्मतिर्यया हरिर्देहभृतामात्मास्वयंप्रकृतिरीश्वरः ५० तत्पादमूलंशरणंयतःक्षेमोनृणामिह सवैप्रियतमश्चात्मायतोनभयमण्वपि इतिवेदसवैविद्वान्योविद्वान्सगुरुर्हरिः ५१ प्रश्नएवंहिसंछिन्नोभवतः पुरुषर्षभ अत्रमेवदतोगुह्यंनिशामयसुनिश्चितम् ५२

वशरणंआश्रय यतःयस्मिन् ५० नचतद्भजनेअन्यभजनवद्दुःखंभयंचेत्याह सइति इतियोवेद सएवविद्वान् सगुरुरेवहरिश्च ५१ उक्तमुपसंहरति एवंभगवतःप्रश्नःसंछिन्नःपरिहृतः तदेवमात्मनोवंधमोक्षप्रकारेकथारूपेणकथितेपिनातिनिर्विण्णचित्तःप्रव्रागमनेप्रतीक्षमाणंसंततंतत्क्षणमेवमहाभयप्रकंपितसकलगात्रंगृहान्निर्वासयितुंहरिणारूपकमाह अत्रेति वदतोमेवचःवृ[illegible]ः ५२

२८ [illegible]

११५अ

त्वद्रमल्पंचरतीतितथातं अभुक्तासमनसांपुष्पाणांशरणेआश्रयेवाटिकयां मिथित्वामिथ्यः पर स्परंस्त्रियासहमिलित्वा तत्रैववरकमासकंषडंघ्रयोभ्रमरास्तेषांगणाः तेषांसामसगीतेषुलब्धःकर्णो यस्यंतंपरेषामसुभिर्द्वितैः स्त्रीयानसंतर्पयंतीत्यसत्तपः नानविगण्यागणयित्वालुब्धकस्यबाणेनभि ३

त्वद्रंचरंतसमनसांशरणेमिथित्वारकंषडंघ्रिगणसामसलुब्धकर्णं अश्रेहत्कर्नसत्तपोवि गणय्ययांतंदृष्टमृगंमृगयलुब्धकबाणभिन्नं ५२ सुमनःसुधर्माणांस्त्रीणांशरणाआश्रमे पुष्पमधुगंधवत् त्वद्रतमंकामंकर्मविपाकजंकामसुखलवंजैव्योपस्यादिविचित्वंतेमिथु नीभूयतरभिनिवेशितमनसंषडंघ्रिगणसामगीतंवदतिमनोहरवनितादिजनालापेष्वति तरामतिप्रलोभितकर्णमग्रेवृकस्यवरात्मनआयुर्हरतोःहोरागातान् कालविशेषान विगणय्यगृहेषुविहरंतंपृष्टतः परोक्षमनुप्रवृत्तोलुब्धकः कृतांतोंतःशरेणयमिहपरावि ध्यतितमिमात्मानमहोराजन्भि

त्रंमृगंमृगयन्वेषय ५२ श्लोकंप्रस्तुतंयोजयन्व्याचष्टे सुमनो भिःसमानोधर्मःपरिणामविरसत्वयासांस्त्रीणां मिथित्येतस्यव्याख्यामिथुनीभूयस्त्रीभिःसहेतिशे षःरतमित्यस्यव्याख्याआयुर्हरतीति यान्तमित्यस्यव्याख्या विहरंतमिति अंतःनलिकायांगूढेनशरेण

श्री॰ उपदेशसारमाह सत्वमिति विचक्ष्व विचारय अंतर्हृदि चित्तं कर्णयोर्धुनीं नदीमिव वहंतीं श्रुतिं चेत्ते नियच्छ एतच्च
भा॰च॰ सर्वेंद्रियोपलक्षणार्थं गृहाश्रमं च जहि कीदृशम् असत्तमानामतिकामुकानां यानि यूथानि तेषां गाथा वा
टी॰ र्त्ता यस्मिन् जीवानां शरणमीश्वरं प्रीणय क्रमेण सर्वतो विरमः ५५ अर्थांतरं प्रष्टुं स्वोक्तमर्थमनुवदति श्रु
११५ तमन्वीक्षितं विचारितं ब्रह्मन्नारद एतच्च उक्तमात्मतत्त्वं उपाध्यायाः ये मम कर्मोपदेष्टार आचार्याः
115

सत्वं विचक्ष्व मृगचेष्टितमात्मनोंतश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते जह्यंगनाश्रम
मसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ५५ राजोवाच श्रुतमन्वीक्षितं
ब्रह्मन्भगवान्यदभाषत नैतज्जानंत्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ५६ संशयोत्र
तु मे विप्र संछिन्नस्तत्कृतो महान् ऋषयोपि हि मुह्यंति यत्र नेंद्रियवृत्तयः ५७ कर्मा
ण्यारभते येन पुमानिह विहाय तं अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ५८

स्ते न जानंति ५६ अतस्तत्कृत उपाध्यायकृतः तद्वाक्यविरोधेनात्मत्वसंभावनारूपो महान्संशयः संछिन्नः त्वया
अत्र तु कश्चित्संशयो वर्त्तते यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति ५७ संशयमाह द्वाभ्यां कर्माणि येन देहेन क
रोति तमत्रैव विहायामुत्रलोकांतरे कर्मोपस्थापितेनान्येन देहेन जुष्टान्युपभुक्तानि जीवोश्नुते प्राप्नोति ५८ ११५

115A

इतिवादः श्रूयतेप्राप्यपुण्यकृतांलोकानिति शारीरजैः कर्मदोषैर्यातिस्थावरतांनरइति तथाचोक्तंवेदेशा
स्त्रीरनुभूयान्तिमिति एतच्चकर्तृभोक्तृदेहभेदेनकृतनाशाकृताभ्यागमप्रसंगान्नसंगच्छतइतिभावः सं
शयोतमाह प्रोक्तंवेदोक्तंकर्मक्रियतेजनैः तज्ज्ञानंतरंतत्क्षणएवपरोक्षंअदृश्यंसन्नप्रकाशते अतःकर्मणो
नष्टत्वान्नद्रोगोपिदृष्टइतिभावः ५९ प्रथमसंशयोत्तरं येनैवेति अव्यवधानेनकर्तृभोक्तृदेहविच्छेदवि

इतिवेदविदांवादः श्रूयतेतत्रतत्रह कर्मयत्क्रियतेप्रोक्तंपरोक्षंनप्रकाशते ५९
श्रीनारदउवाच येनैवारभतेकर्मतेनैवामुत्रतत्समान भुंक्तेह्यव्यवधानेनलिं
गेनमनसास्वयम ६० शयानमिममुत्सृज्यश्वसंतंपुरुषोयथा कर्मात्मन्याहि
तंभुंक्तेतादृशेनेतरेणवा ६१

ना स्थूलदेहनाशोपिमनःप्रधानस्यलिंगदेहस्या ना
शात्रोक्तदोषप्रसंगइत्यर्थः ६० लिंगदेहविशिष्टस्यभोक्तृत्वंस्वप्नदृष्टांतेनस्पष्टयति शयानमिमंजाग्र
देहं श्वसंतंजीवंतं उत्सृज्यतदभिमानंत्यक्त्वा आत्मनिमनसि संस्काररूपेणाहितंकर्मयथाभुंक्ते ता
दृशेनशयानदेहसदृशेनकर्मोपस्थापितेनदेहेन अन्येनवापश्वादिदेहेन तथालोकांतरेपीति
भावः ६१

श्री· भा·च· टी· ११९ 117

न्ननुभवतनामलिंगविशिष्टस्यानेनदृष्टांतेनभोक्तृत्वं कर्तृत्वंतदाप्रतिग्रहादिषुस्थूलदेहविशिष्टस्यैवदृश्य
ते तत्राहममेतिपुत्रादयः असावहंब्राह्मणइतिब्रुवन्मनसायद्यद्देहंगृह्णीयात्ततोदेहाद्राद्धं सिद्धंकर्मपुमा
न्गृह्णीयात् येनकर्मणाएवमहंकारगृहीतेनपुनर्भवोभवति अन्यथाजन्मानुपपत्तेः अतोभिन्नत्वेमनोविशि
ष्टस्यैवकर्तृत्वं अभिमानविषयस्यतद्देहस्यपुत्रादिदेहवद्धारमात्रत्वमितिभावः ६२ यदुक्तंकर्मणोनुष्टत्वा
न्नोपुत्रभोगइतितत्राह यथेति उभयैर्ज्ञानकर्मेन्द्रियैरिंद्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभिश्चित्तमनु·

ममेतिमनसायद्यदसावहमितिब्रुवन् गृह्णीयात्तत्पुमान्राद्धंकर्मयेनपुनर्भवः ६२
यथानुमीयतेचित्तमुभयैरिंद्रियेहितैः एवंप्राग्देहजंकर्मलक्ष्यतेचित्तवृत्तिभिः ६३
नानुभूतंक्वचानेनदेहेनादृष्टमश्रुतं कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि ६४

मीयते सत्यपिसर्वेंद्रियविषयसंबंधेयुगपज्ज्ञानानुपपत्तेः तदुक्तं अत्यादेर्नयुगपज्ज्ञानोत्पत्तिर्मनसोनि
यममिति एवंचित्तवृत्तिभिः पूर्वदेहजंकर्मलक्ष्यतेतासामपियुगपदनुपपत्तेः ६३ इतोपिकर्मलक्ष्यतइत्याह
नानुभूतमितिद्वाभ्यां अनेनवर्तमानेनदेहेन क्वचजन्मनिदपि यन्नानुभूतंअननुभूतंअनुपभुक्तंअदृष्टंचाश्रु ११९
तंचयद्रूपंयदात्मकंयादृग्यत्प्रकारंच तत्कदाचित्स्वप्नमनोरथादिष्वात्मनिमनसिउपलभ्यते ६४

116A

तेनहेतुनास्यलिंगिनोवासनाश्रयस्यजीवस्यतादृशंतदनुभवादियुक्तंएवंदेहसंभवं अदृष्टस्वनिश्चयेनम
न्यस्वनस्यननुभूतोर्थोमनःस्प्रष्टुंमनसिस्फुरितुमर्हति ९५ किंच मनोहृन्यैवएवंपराणिशुभाशुभनिमि
त्तानिशारीराणिज्ञायतेयस्मात् मनएवेति भद्रंतइतिसम्यगव्यवधानार्थमाशिषाभिनंदति भविष्यतउद्भ
वंप्राप्स्यतः नभविष्यतनेचत्वंप्राप्स्यतोपि भावीतिरूपाणिशंसति मनएवोदार्यकार्पण्यादिहेतुभिःएवं

तेनास्यतादृशंराजंल्लिंगिनोदेहसंभवं अदृष्टस्वाननुभूतोर्थोनमनःस्प्रष्टुमर्हति ९५
मनएवमनुष्यस्यपूर्वरूपाणिशंसति भविष्यतश्चभद्रंतेतथैवनभविष्यतः ९६ अ
दृष्टमश्रुतंचात्र कश्चिन्मनसिदृश्यते यथातथानुमंतव्यंदेशकालक्रियाश्रयं ९७

मप्येवमेवासपश्चादप्येवमेवभविष्यतीतिज्ञापयतीत्यर्थः ९८ ननुकदाचिद्दर्शनानर्हमपिस्वप्नेप्रतीयते
यथापर्वताग्रेसमुद्रःदिवानक्षत्राणिस्वशिरश्छेदइत्यादितत्राह अदृष्टमिति अन्यदेशाश्रयं समुद्रादिकंप
र्वताग्रेनिशाश्रयंनक्षत्रादिकं दिवाभ्यंगादिक्रियाश्रयंस्वशिरश्छेदनाश्रयंनिद्रादिदोषेणाहिप्रतीयतइति
अनुमंतव्यंपरस्यापितदुपपत्तेस्तत्स्यत्वादितिभावः स्वान्यस्यानुभवस्यसर्वकर्मे

जन्यत्वमंगीकुर्वतोपिविपरीतत्वमतानैहिकवार्मोगोज
नकत्वेननिग्रहोपपत्तेरलमेवेतेनाप्यप्रयोजनमितिभावः ९०

श्री· ननु दरिद्रः कश्चिदात्मानं महाराजं पश्यति राजा दरिद्रमात्मानं पश्यतीति तत्कथमसंभावितं संगच्छेत् त
त्राह सर्वे इति आयाति भोग्यत्वेन प्राप्नुवंति यांति च भोगानामनंतरं यदि कश्चिदमना भवेत् तदैवं न
भा·च· स्यात् न त्वेतदस्तीत्याह सर्वे समनस इति अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमेण प्रवे
११० शात्तत्रास्य तादृष्टचरः कस्यापि कश्चिदर्थोऽस्तीत्यर्थः ९८ तदेवं सर्वैरपि सर्वेऽर्थाः क्रमेण दृश्यंत इत्युक्तं इ

117

सर्वे क्रमानुरोधेन मनसींद्रियगोचराः आ
यांति वर्गशो यांति सर्वे समनसो जनाः ९८
सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि त
मश्चंद्रमसीवेदमुपरज्यावभासते ९९

दानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह सत्त्वैकनिष्ठे भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसि इदं
विश्वं उपरज्य संयोगमिव प्राप्यावभासते प्रतीत्यनर्हस्यापि कदाचित्प्रतीतौ दृष्टांतः चंद्रमसि उपरज्य ११०
तमः राहुः तदिदं स्वच्छे मनसि सर्वविषयस्फुरणयोगित्वमिति प्रसिद्धं ९९

त

117A तदेवंस्थूलदेहनाशेपिलिंगदेहस्यानाशादन्यः कर्ताअन्योभोक्तेतिनास्तीत्यर्थः तत्रैवंशंकते ननुलिंगदेह
स्यस्थूलद्वारेणैवकर्तृत्वभोक्तृत्वेनतत्केवलस्यतत्रकदाचित्स्थूलदेहाभावेजीवस्यकर्तृत्वभोक्तृत्वाभावान्मु
क्तिः प्रसज्येततत्राह अहंममेतिभावः स्थूलदेहसंबंधःपुरुषेजीवेनव्यवधीयतेनविछिन्नोभवतिकिं
पर्यंतंबुद्ध्यादीनांव्यूहः परिणामोलिंगंयावदस्ति अनादिमान् अनादिःसन् ७० स्वापादावहंकाराद्यभा

नाहंममेतिभावोयंपुरुषेव्यवधीयते यावद्बुद्धिमनोक्षार्थगुणव्यूहोह्यनादिमान् ७० सुप्तिमू
र्छोपतापेषुप्राणायनविद्याततः नेहतेहमितिज्ञानंमृत्युप्रज्वरयोरपि गर्भेवाल्येप्यपौष्कल्यादे
कादशविधंतदा लिंगंनदृश्यतेयूनःकुह्वांचंद्रमसोयथा ७१

वानविच्छेदमाशंक्याह द्वाभ्यां सु
प्त्यादिषुउपतापइष्टवियोगादिजःएवंतेषुअहमितिज्ञानंअहंकारः नेहतेनप्रकाशते प्राणायतनानामिंद्रिया
णामविद्यातात् इंद्रियैरिदंअहंकारास्पदवस्तुग्रहणात्अहंकारःस्फुरतिनान्यथेत्यर्थः ७१ अपौष्कल्यात्असंपूर्ण
त्वात् प्राणायतनानामितिशेषः पुनस्तरुणस्ययदेकादशविधंप्रकाशंइंद्रियैःस्फुटंलिंगमहंकरणंतन्नदृ
श्यते गर्भादेरितिशेषः सतोप्यनभिव्यक्तौदृष्टांत कुह्वाअमावस्यायांचंद्रमसोलिंगंरूपमिव ७२

श्री· तस्मादहंकारेसमदस्यस्थूलदेहस्याविच्छेदाद्वस्तुभूतार्थाभावेपिसंसृतिनिवृत्तिर्नास्तीत्याह अर्थेह्यीति ७३ या
भा·च· वल्लिंगस्थूलदेहाविच्छेदात्संसारानिर्वृत्तिरित्येतत्प्रपंचयति एवमितिसार्धैस्त्रिभिः पंचविधंपंचतन्मात्रा-
टी· त्मकंत्रिवृत् त्रिगुणंषोडशविकारात्मनाविस्तृतं ७४ ७५ नन्वेकंदेहंविसृज्यदेहांतरप्रवेशात्सर्वमदेहता
११८
118

अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा ७३
एवंपंचविधंलिंगंत्रिवृत्षोडशविस्तृतं एषचेतनयायुक्तोजीवइत्यभिधीयते ७४ अने
नपुरुषोदेहानुपादत्तेविमुंचति हर्षंशोकंभयंदुःखं(सुखं)चानेनविंदति ७५ यथात्रुण सुखं
जलौकैवंनापयात्यपयातिच नत्यजेन्म्रियमाणोपिप्राग्देहाभिमतिंजडः ७६ यो
वदन्यंनविंदेतव्यवधानेन्नकर्मणा मनएवमनुष्येंद्रभूतानांभवभावनं ७७ नेः

वाजेनम्रि

स्यादेवेत्यतआह यथेति नापयातितृणस्यत्यागादपयातिचतृणांतरधारणात् तथानत्यजेत् ७६ अ
न्यदेहंकर्मणांप्राग्देहारंभकाणां व्यवधानेनविच्छेदेनसमाप्त्याप्रकरणार्थमुपसंहरति मनएवेति भ ११८
वभावनंसंसारहेतुः ७७

कथंसतितदाह यदेति चरितान्उपशृण्वान्यतःकर्मणिसति नन्वसंगस्यज्ञातःकर्मतत्राह अविद्यायां
सत्यांअनात्मनोदेहादेःकर्मणिबंधोभवति ७८ विश्वस्थित्यादयोयतोहरेर्भवंति ७९ हंसयोर्जीवेश्वर

यदातैश्चरितान्ध्यायन्कर्माण्याचिनुतेसकृत् सतिकर्मण्यविद्यायांबंधःकर्मण्यनात्मनः ७८
अतस्तदपवादार्थंभजसर्वात्मनाहरिं पश्यंस्तदात्मकंविश्वंस्थित्युत्पत्त्यप्ययायतः ७९ मैत्रेयः भा
गवतमुख्योभगवान्नारदोहंसयोर्गतिं प्रदर्श्यह्यमुमामंत्र्यसिद्धलोकंततोगमत् प्राचीनबर्ही
राजर्षिःप्रजासर्गाभिरक्षणे आदिश्यपुत्रानगमत्तपसेकपिलाश्रमं ८१ तत्रैकाग्रमनाधीरोगो
विंदचरणांबुजे विमुक्तसंगोनुभजन्भक्त्यातत्साम्यतामगात् एतदध्यात्मपारोक्ष्यंगीतंदेवर्षि
णानघ यःश्रावयेद्यःशृणुयात्सलिंगेनविमुच्यते ८३ एतन्मुकुंदयशसाभुवनंपुनानंदेवर्षि
वर्यमुखनिःसृतमात्मशौचं यःकीर्त्यमानमधिगच्छतिपारमेष्ठ्यंनास्मिन्भवेभ्रमतिमुक्तस
मस्तबंधः ८४

योः ८० पुत्रानादिश्येत्यपुत्रानादिश्येतिपुत्राणामादेशंमैत्रिणामग्रेकथयित्वा ८१ ८३ आत्मशौचंमा
नःशोधकं पारमेष्ठ्यंसर्वोत्कृष्टफलदं ८४

स्त्रियात्वद्यासदितस्याश्रमोद्दंकारः छिन्नोभवति अमुत्रकर्मफलभोगः कथमितिसंशयः छिन्नः ८५ इति
चतुर्थेएकोनत्रिंशः २९ प्रसंगात्पंचभिः प्रोक्तं वृत्तंप्राचीनवर्हिषः वर्णितेचपुनर्द्वाभ्यांप्रसक्तेतेचप्रचेतसो
तेत्रिंशोतपस्तुष्टादीषालब्धवरास्ततः आगत्यवार्त्तीमुद्वाह्यराज्यंचक्रुः रितीर्यते रुद्रहरिंप्रतोष्यकोसिद्धिमा

अध्यात्मपारोक्ष्यमिदंमयाधिगतमद्भुतं एवंस्त्रियाश्रमः पुंसश्छिन्नोमुत्रचसंशयः ८५ इतिचतुर्थे
एकोनत्रिंशः २९ विदुरउ॰ येत्वयाभिहिताब्रह्मन्सुताः प्राचीनवर्हिषः तेरुद्रगीतेनहरिंसिद्धिमा
पुः प्रतोष्यकां १ किंवार्हस्पत्येहपरत्रवाथकैवल्यनाथप्रियपार्श्ववर्त्तिनः आसाद्यदेवंगिरिशंय
दृच्छयाप्रापुः परंनूनमथप्रचेतसः २ मैत्रेयउ॰ प्रचेतसोंतरुदधौपितुरादेशकारिणः जपयज्ञे
नतपसापुरंजनमतोषयन् ३ दशवर्षसहस्रांतेपुरुषस्तुसनातनः तेषामाविरभूत्कृच्छ्रंशांते

पुः १ हेवार्हस्पत्य कस्यांचिद्दिशायांबृहस्पतेः मैत्रेयः शिष्यइतिज्ञातव्यं ते \\ नशमयन्रुचा ४
यदृच्छयागिरिशंप्राप्य तस्यैवकैवल्यनाथप्रियस्यगिरिशस्यपार्श्ववर्त्तिनस्तदनुगृहीताः संतोनूनंपरंमो
क्षंप्रापुरेवततः एवंतुइहाथवापरत्रकिंप्रापुः २ रुद्रगीतजपरूपेणयज्ञेनतपसाच पुरंजनंहरिं ३ तेषां
कृच्छ्रेतपः क्लेशंरुचाकांत्याशमयन् शांतेसत्वेनवपुषाविर्भूतः ४ ॥ ११९

119A

सुपर्णस्कंधमारूढः इत्यादिनावर्हिष्मतः सुतानांहेतित्तृतीयेनान्वयः ५ कनकमयेनस्वर्णाव्रताविभूष
णेनभ्राजमानेकपोलेवदनेयस्य अष्टभिरायुधैर्गरुडप्रवकिन्नरैस्तेनपन्नस्वनैर्गीताकीर्तिर्यस्य ६ पी
नास्वतेआयताअष्टौभुजास्तेषांमंडलेसंसुहृदः तन्मध्येस्थितलक्ष्म्यास्पर्धमानाश्रीः शोभायस्याःतयाव

सुपर्णस्कंधमारूढोमेरुशृंगमिवांबुधः पीतवासामणिग्रीवःऊर्वन्वितिमिरादिशः ५ का
शिस्सुनाकनकवर्णाविभूषणेनभ्राजत्कपोलवदनोविलसत्किरीटः अष्टायुधैरनुचरैर्मुनिभिः
सुरेंद्रैरासेवितोगरुडकिंनरगीतकीर्तिः ६ पीनायताष्टभुजमंडलमध्यलक्ष्म्यास्पर्धच्छ्रि
यापरिवृतोवनमालयाद्यः वर्हिष्मतःपुरुषआह सुतान्प्रपन्नान्पर्जन्यनादरुतयासघृणा
वलोकः ७ श्रीभगवानुवाच वरंवृणीध्वंभद्रंवोयूयंमेनृपनंदनाः सौहार्देनापृथग्धर्मा
मोस्तुष्टोहंसौहृदेनवः ८

नमालयापरिवृतः आद्यः पुरुषआहः पर्जन्यनादइवरुतंनादो
यस्याः तयावाचासघृणोवलोकोयस्य ७ यूयंमत्तोवृणीध्वं सौहार्देनहेतुना अपृथग्धर्मायेषांसं
बोधनंवः परस्परंसौहृदेनतुष्टोहं ८ ॥

श्री॰ भूतेषुसौहृदंचभविष्यति ९ तेभ्योदास्ये किंपुनर्युष्मभ्यमितिशेषः १० अग्रहीष्टगृहीतवतः अथोइतिहेतोःलो
भा॰च॰ कानानुलोकेषुभविष्यति यद्वा लोकाननुभविष्यतिइत्यतिव्याप्स्यतीत्यर्थः ११ आत्मनोवीर्येणसंतानेन १२ अत्रार्थ
१२० मादौभार्यांसंपादयति कंडोरितित्रिभिः तपोनाशार्थमिंद्रप्रेषितयाप्रम्लोचयाकंडुर्नामऋषिर्बहुकालंरेमे साचत
120

योनुस्मरतिसंध्यायांयुष्माननुदिनंनरः तस्यभ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदं ९ येतुमांरुद्रगी
तेनसायंप्रातःसमाहिताः स्तुवंत्यहंकामवरान्दास्येप्रज्ञांचशोभनां १० यद्यूयंपितुरादेशमग्रहीष्ट
मुदान्विताः अथोवउशतीकीर्तिर्लोकाननुभविष्यति भविताविश्रुतःपुत्रोनवमोब्रह्मणोगुणैः य
एतामात्मवीर्येणत्रिलोकींपूरयिष्यति १२ कंडोःप्रम्लोचयालब्धाकन्याकमललोचना तांचापवि
द्धांजगृहुर्भूरुहानृपनंदनाः १३ क्षुत्क्षामायामुखेराजासोमःपीयूषवर्षिणीं देशिनींरोदमानाया
निदधेसदयान्वितः प्रजाविसर्गआदिष्टाःपित्रामामनुवर्तता तत्रकन्यांवरारोहांतामुद्वहतमाचिरं १४

तःस्वर्गंगच्छंतीकंडोर्जातंगर्भंवृक्षेषुत्यक्त्वाजगाम तदेतदुक्तं अपविद्धांत्यक्तां १३ सप्रसिद्धोवनस्पतीनांराजासो
मः अमृतस्राविणींदेशिनींतर्जनींरुदंत्यास्तस्यामुखेनिदधे अनेनाप्सरोसोगर्भसंभवेनामृताहारेणचतस्याला
वण्यंक्षमसेदर्दौग्ध्यादिरादित्यंचोक्तं १४ ममानुवर्तमानेनपित्रानियुक्ताःसंतःतत्रप्रजासर्गनिमित्तेनतामु॥ स्कं ९

१२०

120A

ननुबहूनांकथमेकाभार्यास्यात्तत्राह अदृष्टपृथग्धर्मःशीलंचयेषांतेषांचपत्नीभूयात् अर्पितोभवत्स्वाशयोय
या धर्मशीलयोरैक्यात महाकाव्यवनेदृष्टादृष्टविरोधइति १९ अहंतोजसःअप्रतिहतबलाःसंतः १७ पञ्चत्र
त्वोदृपकामादिमलस्याशयोयेषां अतःलोकद्वयभोगान्निर्विघ्नमस्यानंप्राप्स्यथ १८ ननुगृहेषुप्रविष्टाना
मस्माकंतदासक्त्याबंधएवस्यात् उतस्त्वद्भक्तिर्निर्वेदोवातत्राह गृहेष्विति कुशलंमय्यर्पितंकर्मयेषां मह्या
अदृष्टपृथग्धर्मशीलानांसर्वेषांवःसमध्यमा अदृष्टपृथग्धर्मशीलेयंभूयात्त्वत्समर्पिताशया १८ दिव्यवर्षस
हस्राणांसहस्रमहंतोजसः भौमान्भोक्ष्यथभोगान्वैदिव्यांश्चानुग्रहान्मम १७ अथमय्यनुपायिन्याभ
क्त्यापक्वगुणाशया उपयास्यथमद्धामनिर्विद्यनिरयादतः १८ गृहेष्वाविशतांचापिपुंसांकुशलक
र्मणां मद्वार्तायातयामानांनबंधायगृहामताः १९ नव्यवद्धृदयेयज्ञोब्रह्मैतद्ब्रह्मवादिभिः नमु
ह्यंतियातोयामःकालोयेषां १९ त्वद्वार्ताश्रोतॄणांगृहैर्नैवबंध॥ संतिनशोचंतिनहृष्यंतियतोगताः ॥
इतिकुतस्तत्राह नव्यवदिति यद्यस्मात् कथाश्रवणात् ज्ञः सर्वज्ञोहमीश्वरः ब्रह्मवादिभिःप्रवक्तृभिःनि
मात्रैः मित्तभूतैःश्रोतॄणांहृदये नव्यवत् प्रतिपदं नूतनवत् अयेप्रामोमिंसाक्षात्कारोभवतीत्यर्थः ननुत्वत्क
थाश्रवणेकथंब्रह्मसाक्षात्कारस्तत्राह योहमेतदेवब्रह्म तद्धेतः यतोगताःयमाःप्रामाः संतोमोहशोक
हर्षान्नप्राप्नुवंति अतोमत्कथाश्रवणेननव्यवदेकमहृद्याविर्भावादस्यैवब्रह्मसाक्षात्कारतान्गृहेषुवसताम

ब्रह्म२

श्री· भा· च· टी· १२१ 121

पुरुषार्थंभाजयतिप्रापयतीतितंयातं २१ वेदैः सकलश्रेयःसाधनत्वेननिरूपिताउदारगुणाश्राह्वयानामा
नित्यस्य मनोवचसोर्वेगादपिपुरोग्रतोजवोवेगोयस्य मनोवचसोरगोचरायेत्यर्थः अतएवसर्वेषामन्तःकरणा
मार्गैरगतःअनवगतोधायस्तस्मैतेनमः २२ स्वनिष्ठयास्वरूपस्थित्याशुद्धाय अतःशांतायमनसिनिमि

मैत्रेयउ॰ एवंब्रुवाणंपुरुषार्थभाजनंजनार्दनंप्रांजलयःप्रचेतसः तद्दर्शनध्वस्ततमोरजोमलागिरा
गृणन्तागृदयामहःतमं २१ प्रचेतसऊ॰ नमोनमःक्लेशविनाशनायनिरूपितोदारगुणाह्वयाय
मनोवचोवेगपुरोजवायसर्वान्तमार्गैरगताध्वनेनमः २२ शुद्धायशांतायनमःस्वनिष्ठयामनस्य
पार्थविलसद्द्वयाय नमोजगत्स्थानलयोदयेषुगृहीतमायागुणविग्रहाय २३ नमोविशुद्धसत्त्वा
यहरयेहरिमेधसे वासुदेवायकृष्णायप्रभवेसर्वसात्वतां २४ नमःकमलनाभायनमःकमलमा
लिने नमःकमलपादायनमस्तेकमलेक्षण २५ नमःकमलकिंजल्कपिशंगामलवाससे सर्वभूत
निवासायनमोयुक्ष्महिसाक्षिणे २६ रूपंभगवतायेतदशेषक्लेशसंक्षयं आविष्कृतंनःक्लिष्टानांकिम
न्यदनुकंपितं २७

तेसति अपार्थंव्यर्थमेवविलसद्द्विस्फुरितंद्वयंरूपंयस्मिन् गृहीतामायागुणैर्विग्रहाब्रह्मादिमूर्तयोयेन स्वतस्त्वा
विशुद्धसत्त्वास्वरूपायसंसारंहरतिमेधाज्ञानंयस्यतस्मै २४ २५ अयुक्ष्महिकृतवंतोवयं २६ यदुक्तंवरंवृणीध्वमि
तितन्मनसिविधायाहुः रूपमिति समस्तानांक्लेशानांसंक्षयोयस्मात् नःआविष्कृतंप्रकटितमनोन्यत्किमनुकं

विनमद्भकंपायसेवाक्सांकंपारमात्रकमेसर्वः २८

१२१

121A

अतश्चयतश्चाह हेअभद्ररंधन मंगलनाशनत्वंप्रत्ययोत्रनविवक्षितः एतावदेवदीनेषुवत्सलैःप्रभुभि
र्भवद्भिःकार्यं किंतत्तदाह यदिति अस्मदीयायतेशतिबुद्ध्याउचितेकालेअनुस्मर्यतेइतियत् त्वयातद्रंद
र्शितमितिभावः २८ येनानुस्मरणेनस्मृतानांतेषामुपशांतिःसुखंभवति किंच वैत्वलूकानामपिभूताना
मंतर्हृदयेंतर्हितः अंतर्यामितेनस्थितोभगवानीहतामिच्छतां तवउपासकानांनोस्माकमाशिषः कस्मादे

एतावद्धिविभुविर्भाव्यंदीनेषुवत्सलैः यदनुस्मर्यतेकालेस्वबुद्ध्याभद्ररंधन २८
येनोपशांतिर्भूतानांक्षुल्लकानामपीहतां अंतर्हितोंतर्हृदयेकस्मान्नोवेदनाशिषः २९
असावेववरोस्माकमीप्सितोजगतःपते प्रसन्नोभगवान्येषामपवर्गगुरुर्गतिः ३०
वरंवृणीमहेथापिनाथत्वत्परतःपरात् नह्यंतस्त्वद्विभूतीनांसोनंतइतिगीयसे ३१

तोनवेदजानातीत्यर्थः २९ तथापिवक्तव्यंचेत्तर्हियेषामस्माकंभगवान्प्रसन्नः असावेववरः भगवत्प्रसा
दएवास्माकमीप्सितोवरइत्यर्थः अपवर्गगुरुः मोक्षमार्गप्रदर्शकः गतिःस्वतश्चपुरुषार्थभूतः ३० यद्यप्ये
वमथापि हेनाथ त्वत्तस्त्वत्तःवरमेकंवृणीमहे कथंभूतात्परतःकारणादपिपरात् अक्षरात्परतःपरइति
श्रुतेः अतोयद्यपित्वंदातुंसमर्थः नचदेयानांत्वद्विभूतीनामंतोस्ति यतोनंतविभूतित्वादनंतइतिगीय

श्री० भा० च० टी० १२२

वड़ 123

तथापि यथासारंगोभ्रमरः पारिजाते स्वेनलब्धेसति स्वलभमप्यसद्वृक्षान्तरं नसेवते तथा वयमपि साक्षात्त्वदं
घ्रिमूलंप्राप्य किंकिंवृणीमहि नकिंचिदित्यर्थः किमप्यन्यत्तुच्छं किमर्थंवृणीमहि तर्हिकिंकिंवृणीमहि त्व
न्नेतत्तेनमनोरथानामनवस्थानादित्यर्थः ३२ अतएतावदेवप्रार्थयाम इत्याहुः यावदिति स्पृष्टाव्याप्ताः सतः
भगवतिप्रकृष्टः संगोयेषांतेषांसंगोस्माकंस्यात् ३३ ननुराज्यभोगान्स्वर्गापवर्गौचविहायकिमिदंप्रार्थ्यते
पारिजातेंजसालब्धेसारंगोन्यन्नसेवते त्वदंघ्रिमूलमासाद्यसाक्षात्किंकिंवृणीमहि ३२ यावत्तेमा
ययास्पृष्टाभ्रमामइहकर्मभिः तावद्भवत्प्रसंगानांसंगः स्यान्नोभवेभवे ३३ तुलयामलवेनापिनस्वर्गं
नापुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः यत्रेड्यंतेकथामृष्टास्तृष्णायाः प्रशमोयतः
निर्वैरंयत्रभूतेषुनोद्वेगोयत्रकश्चन ३५ यत्रनारायणः साक्षाद्भगवान्न्यासिनांगतिः संस्तूयतेसत्क
थासुमुक्तसंगैः पुनःपुनः तेषांविचरतांपद्भ्यांतीर्थानांपावनेच्छया भीतस्यकिंनरोचेततावकानांसमा
गमः ३७ वयंतुसाक्षाद्भगवन्भवस्यप्रियस्यसख्युःक्षणसंगमेन सुदुश्चिकित्स्यस्यभवस्यमृत्योर्भिषक्तमं त्वाद्यगतिंगताःस्म ३८
तत्राहुः तुलयामेति भगवत्संगिनांसंगस्यलवेनापि ३४ सत्संगस्यश्रैष्ठ्यंप्रपंचयंति यत्रेतित्रिभिः यत्रयेभ्यय
तः मृष्टाभ्यः कथाभ्यः निर्वैरं वैराभावः ३५ ३६ पद्भ्यांपावनेच्छया संसारभीतस्य ३७ सत्संगफलमस्माभिरेवानुभूत
मित्याहुर्वयंत्विति तववयः प्रियः सखातस्यभवस्यान्यंतमचिकित्स्यस्यजन्मनोमृत्योश्चभिषक्तमं सद्वैद्यंत्वाद्यमति

रामः १२२

123A

वरांतंवृणीते यन्नरतिद्वाभ्यां नताः नमस्कृताः ३९ निरंधसांनिरन्नानां अदभ्रंबहुकालंतेपरितोषणा
यभवतिवृणीमहे ४० अन्तानामप्यस्माकंचस्तुतिनोयुक्त्याऽजः मनुरिति यस्यतवमहिम्नोनुदृष्टपा
रंयेस्तेपित्वामात्मसमंस्वशक्त्यानुरूपंयथास्तुवंति अथोअतः वयमपिगृणीमः ४१ सत्वमूर्तयेवासु
यन्नःस्वधीतंगुरवःप्रसादिताविप्राश्चवृद्धाश्चसदानुवृत्त्या आर्यानताःसुहृदोभ्रातरश्चसर्वाणिभू
तान्यनसूययैव ३९ यन्नःसुतप्तंतपएतदीशनिरन्धसांकालमदभ्रमप्सु सर्वंतदेतत्पुरुषस्यभू
म्नोवृणीमहेतेपरितोषणाय ४० मनुःस्वयंभूर्भगवान्भवश्चयेतेतपोज्ञानविशुद्धसत्वाः अदृष्ट
पाराअपियन्महिम्नःस्तुवंत्यथोत्वात्मसमंगृणीमः ४१ नमःसमायशुद्धायपुरुषायपरायच
वासुदेवायसत्वायतुभ्यंभगवतेनमः ४२ मैत्रेयउ० इतिप्रचेतोभिरभिष्टुतोहरिःप्रीतस्तथे
त्याहशरण्यवत्सलः अनिच्छतांयानमतृप्तचक्षुषांययौस्वधामानपवर्गवीर्यः ४३ अथनिर्या
यसलिलात्प्रचेतसउदन्वतः वीक्ष्याकुप्यन्द्रुमैश्छन्नांगांगांरोद्धुमिवोच्छ्रितैः ४४
देवाय ४२ यानेस्वप्रयाणमनिच्छतामपिसतांस्वधामययौ अनपवर्गवीर्यः अकुंठितप्रभावः ४३ उद
न्वतःसिन्धोःसलिलान्निर्यायनिर्गत्य यांस्वर्गंरोद्धुमिवोच्छ्रितैःद्रुमैःगांमहींछन्नांवीक्ष्यद्रुमेभ्योऽकुप्यन्
तदाहिप्राचीनबर्हिषःप्रव्रजितत्वादराजकेकर्षणाभावाद्द्रुमैर्भूमिश्छन्नाभूत ४४

श्री॰ निरस्तावीरुधोपियस्मात्तथाभूतांकर्तुं संवर्तकः कालाग्निरुद्रः ४५ नयैर्युक्तिभिः ४६ उज्जह्रुः समर्पया
भा॰च॰ मासुः ४७ मारिषांवार्क्षी अजनयोनिर्ब्रह्मा तस्माज्जातोदक्षः महतः श्रीमहादेवस्यावज्ञानात्सर्वमज
१२३
123

ततोग्निमारुतौराजन्नसंचन्मुखतोरुषा महींनिर्वीरुधंकर्तुंसंवर्तकइवात्यये ४५
भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्यपितामहः आगतःशमयामासपुत्रान्बर्हिष्मतोनयैः
तत्रावशिष्टायेवृक्षाभीताडुहितरंतदा उज्जह्रुस्तेप्रचेतोभ्यउपदिष्टाःस्वयंभुवा ४७ ते
चब्रह्मणआदेशान्मारिषामुपयेमिरे यस्यांमहदवज्ञानादजन्यजनयोनिजः ४८
चाक्षुषेत्वंतरेप्राप्तेप्राक्सर्गेकालविद्रुते यःससर्जप्रजाःसर्वाःसदक्षोदैवचोदितः ४९
योजायमानःसर्वेषांतेजस्तेजस्विनोरुचा स्वयोपादत्तदाक्ष्याच्चकर्मणांदक्षमब्रुवन् ५०

नयोनिजोब्रह्मपुत्रोपिसन् क्षत्रियजातौयस्यांअजनिजातः ४८ प्राक्सर्गेपूर्वदेहेकालेनविद्रुते दैवेने
श्वरेणचोदितःसन्सृष्टःप्रजाःससर्जदक्षःसइतिप्रसिद्धः ४९ स्वयारुचाप्रभयातेज उपादत्ताच्छादि १२३
तवान् यंचकर्मणांदाक्ष्याद्दक्षमब्रुवन् ५०

123A तमभिषिच्यानादिर्ब्रह्माप्रजासर्गरक्षायां पुयोज सचदक्षोन्यान्मरीच्यादीन्स्तद्व्यापारेषुनियुक्तवान् ५। ३
तिचतुर्थेविंशः ३ एकविंशेस्तेदक्षेपुत्रेन्यस्यवनेसतां नारदोक्तेनमार्गेणमुक्तिंतत्काप्रचेतसो ततः
हित्वावर्षसहस्राणांमहस्रसंख्यातेउत्पन्नविवेकज्ञानास्ते उपपासस्थमहामनिर्विर्ययनिरयादततश्चस्यधोक्षज

तेप्रजासर्गरक्षायामनादिरभिषिच्यव युयोजयुयुजेन्यांश्चसवे सर्वप्रजापती ५। ३
तिचतुर्थेविंशः ३ मैत्रेयउवाच॥ ततउत्पन्नविज्ञानाश्चाश्वधोक्षजभाषितं स्मरंतश्चा
त्मजान्भार्यांविसृज्यप्राव्रजन्गृहात् १ दीक्षिताब्रह्मसत्रेणसर्वभूतात्ममेधसा प्रती
च्यांदिशिवेलायांसिद्धोभूद्यत्रजाजलिः २ तान्निर्जितप्राणमनोवचोदृशोजितास
नान्शांतसमानविग्रहान् परेमलेब्रह्मणियोजितात्मनः सुरासुरेज्योददृशेस्मनारदः ३

भावितंस्मरंतश्चात्मप्राव्रजन् १ ब्रह्मसत्रेणात्मविमर्शेनदीक्षिताः हुतसंकल्पाः बभूवुः सर्वेषामात्मेतिमे
धाज्ञानंयस्मिन् तेनत्वद्वेलायां समुद्रतीरेजाजलिर्नामऋषिः २ निर्जिताप्राणामनोवचोदृशोयैस्तान्
शांताउपरताः समानाम्सलाधाराराभ्यक्षजवोविग्रहायेषांब्रह्मणियोजितआत्मायैः सुरासुरैरिज्योददृ

चि

श्री·
भा·च·
टी·
१२४
124

उत्थायतंप्रणिपत्य यथादेशंयथाविधिपूजयित्वा ४ ५ आदिष्टमुपदिष्टंयदात्मतत्त्वंतत्क्षपितंविस्मृतं ६ प्रचे
तोभिः पृष्टः ८ अहोगृहप्रसक्त्याहरिसेवांविनासर्वंजन्मकर्मादिकंव्यर्थंकृतमितितान्शोचन्नाह तज्जन्मे।

तमागतंतउत्थायप्रणिपत्याभिनंद्यच पूजयित्वायथादेशंसुखासीनमथाब्रुवन् ४ प्रचेतस
ऊ· स्वागतंतेसुरर्षेद्यदिष्ट्यानोदर्शनंगतः तवचंक्रमणंब्रह्मन्नभयाययथारवेः ५ यदादिष्टंभग
वताशिवेनाधोक्षजेनच तद्गृहेषुप्रसक्तानांप्रायशःक्षपितंप्रभो ६ तन्नःप्रद्योतयाध्यात्मज्ञानं
तत्त्वात्मदर्शनं येनांजसातरिष्यामोदुस्तरंभवसागरं ७ मैत्रेयउ· इतिप्रचेतसांपृष्टोभगवान्ना
रदोमुनिः भगवत्युत्तमश्लोकआविष्टात्माब्रवीन्नृपान् ८ नारदउ· तज्जन्मतानिकर्माणितदायु
स्तन्मनोवचः नृणांयेनेहविश्वात्मासेव्यतेहरिरीश्वरः ९ किंजन्मभिस्त्रिभिर्वेहशौक्रसावित्रया
ज्ञिकैः कर्मभिर्वात्रयीप्रोक्तैःपुंसोपिविबुधायुषा १० श्रुतेनतपसावाकिंवचोभिश्चित्तवृत्तिभिः बु
ध्यावाकिंनिपुणयाबलेनैंद्रियराधसा ११

तिचतुर्भिः यतोयस्माद्धरिसेवैवफलमतस्तद्विहीनंस
र्वंव्यर्थमित्यर्थः ९ शौक्रंसंबंधिजन्म विशुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन याज्ञिकंदीक्षया
विबुधानामिवदीर्घायुषापि १० वचोभिर्वाग्विलासैः चित्तवृत्तिभिः नानावधानसामर्थ्यैः इंद्रियाणांराधसापा

षा

१२४

124A

योगेनप्राणायामादिना सांख्येनदेहादिव्यतिरिक्तात्मज्ञानमात्रेण संन्यासवेदाध्ययनाभ्यामपि अ
न्यैरपिव्रतवैराग्यादिभिः श्रेयोभिःसाधनैः १२ नन्वेषांनानाफलसाधनानांहरिसेवाभावमात्रेणकुतोवै
यर्थ्यंतत्राह श्रेयसांफलानांमात्मैवावधिः पराकाष्ठा अर्थतःपरमार्थतः आत्मार्थत्वेनैवान्येषांप्रियत्वा
दित्यर्थः भवत्वात्मावधिःहरेःकिमायातंतत्राह सर्वेषामपीति आत्मदृष्ट्याविद्यानिरासेनस्वरूपाभिव्यंज
कः येश्वरेणापिरूपेणबलिप्रभृतिभ्योप्यात्मप्रदः प्रियश्चपरमानंदरूपत्वात् १३ किंच नानाकर्मभिस्तत्तद्दे

किंवायोगेनसांख्येनन्यासस्वाध्याययोरपि किंवाश्रेयोभिरन्यैश्चनयत्रात्मप्रदोहरिः १२ श्रेयसा
मपिसर्वेषामात्माह्यवधिरर्थतः सर्वेषामपिभूतानांहरिरात्मात्मदःप्रियः १३ यथातरोर्मूलनि
षेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः प्राणोपहाराच्चयथेंद्रियाणांतथैवसर्वार्हणमच्युतेज्या १४

न

वताप्रीतिनिमित्तान्यपिफलानिहरिप्रीत्याभवंति केवलंतद्देवताराधनेतनुकिंचिदितिसदृष्टांतमाह यथे
ति मूलात्प्रथमभागाःस्कंधाः तद्विभागाभुजाः तेषामुपशाखाः उपशाखाः उपलक्षणं पत्रपुष्पादयोपि
तृप्यंति नतुमूलमेकंविनास्वस्वनिषेचनेनप्राणस्योपहारोभोजनं तस्मादेवेंद्रियाणांतृप्तिः नतुतत्तदिंद्रि
येषुपृथक्पृथक् गायत्रलेपनेन तथाच्युताराधनमेवसर्वदेवताराधनेननपृथगित्यर्थः १४

ऊतः सर्वमूलत्वादिति सदृष्टांतमाह यथैव वारः जलानि वर्षाकाले सूर्योद्भवंति ग्रीष्मे तस्मिन्नेव प्रविशं
ति अस्याप्रसिद्धत्वेन दृष्टांतांतरमाह यथा भूतानि भूमाविति गुणप्रवाहश्चेतनाचेतनात्मकः प्रपंचः १५ ननु
हरावेव गुणप्रवाहस्तत्कैः गुणप्रवाहाधारत्वेन सोपाधिकत्वं हरेः स्यादित्याशंक्याह एतदिति एतद्धि सर्वं विलो
लत्वं शास्त्रप्रसिद्धं परं पदं सर्वोपाधिरहितं तदुत्पन्नत्वान्न ततः पृथगित्यर्थः तर्हि कथमन्यथा भातीति तत्रा

यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले भूतानि भूमौ स्थिरजंगमानि तथा हरावेव
गुणप्रवाहः १५ एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा यथासवो जायति सं
प्रशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययाः १६ यथा नभस्यभ्रतमः प्रकाशा भवंति भूपा न भवंत्य
ह सकृदिति सकृत्कदाचिद्भातं स्फुरितं गंधर्वनगार \\ नुक्रमात् एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमः सत्त्वमिति प्रवाहः १७
वत् यथा सवितुः प्रभा न ततो भिन्ना यथा च जायति असवः इंद्रियाणि स्फुरंति संप्रमोत्संप्रशक्तयो भवं
तीत्यर्थः कथंभूतास्ता इत्याह द्रव्यादीनां त्रिविधाहंकारकार्याणां तन्निमित्तस्य भेदभ्रमस्य चात्ययो यस्मात्ताः यद्वा
जायतीति संप्रमो असवः संप्रशक्तयो येषां ते भवंति द्रव्यादेरप्यत्ययो भवति सवितुः प्रभेत्युक्तो दृष्टांत इति १६
ननु असंगे हरौ कथं प्रपंचोत्पत्तिलयौ तत्राह यथेति अभ्रतमः प्रकाशा आगमापायिनो रजस्तमः सत्त्वस्थानी

याः हे भूपाः प्रचेतसः अमूः शक्तयः न भवंति लीयंते इति एवमयं जगत्प्रवाहः १७

125A

तेनसर्वकारणत्वेनहेतुनाकालोनिमित्तं प्रधानमुपादानं पुरुषकर्त्ता एतत्त्रितयात्मकत्वात्सर्वकारणं
परमेश्वरमद्धासाक्षाद्भजधं कथं आत्मनएकभावेनाभिन्नत्वेन १८ साधनमाहदयादिभिः शीघ्रंतुष्यति १९
ततोनकदाचिद्विमुह्यतीत्याह अपहताः निरस्ताः सकलाएषणाः कामायस्मात्सचासावमलश्चात्मामनः त
स्मिन्सततामनसिनिरंतरमेधितयाभावनोपहूतः सन्नक्षरोहृदिच्छिद्रवदाकाशवर्त्ततोनसरतिनापयाति॥

तंनैकमात्मानमशेषदेहिनां कालंप्रधानंपुरुषंपरेशं स्वतेजसाध्वस्तगुणप्रवाहमात्मैक
भावेनभजध्वमद्धा १८ दययासर्वभूतेषुसंतुष्ट्यायेनकेनवा सर्वेंद्रियोपशांत्याचतुष्यत्याशु
जनार्दनः १९ अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः निजजनवशा॰
गत्वमात्मनोयन्नसरतिछिद्रवदक्षरः सतांहि २० नभजतिकुमनीषिणांसइज्यांहरिरधना
त्मधनप्रियोरसज्ञः श्रुतधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु २१

हि किं कुर्वन्आत्मनोनिजजनवशात्वंस्वभक्ताधीनत्वमयन् अवगच्छन् २० सतामेवंवश्योसावसतांतुपू
जामपिनगृह्णातीत्याहनेति कुमनीषिणांकुत्सितमतीनांअधनाश्चते आत्मधनाश्चभगवद्भक्तास्तेप्रियायस्य
रसज्ञः भक्तिसुखज्ञः केकुमनीषिणस्तानाह श्रुतादिनिमित्तैर्मदैर्येसत्सुपापंतिरस्कारंकुर्वंति २१

श्री· भक्ताधीनत्वंप्रपंचयन्नाह अनुवर्त्तमानामपिश्रियंतदर्थिनःसकामान्द्विपदपतीन्नरेंद्रान्विबुधान्देवानपियो
भा·च· नानुवर्त्ततेयतःस्वैनैवपूर्णः अतःस्वभृत्यवर्गानुरक्तमेव एवंभूतमप्यमीषदपिकथंपरित्यजेत् २२ प्रचेत
टी·
१२६
126

श्रियमनुचरंतींतदर्थिनश्चद्विपदपतीन्विबुधांश्चयःस्वपूर्णः नभजतिनिजभृत्यवर्गतंत्रःकथममुम्
विसृजेत्पुमान्कृतज्ञः २२ मैत्रेयउ० इतिप्रचेतसोराजन्नन्याश्चभगवत्कथाः श्रावयित्वाब्रह्मलोकं
ययौस्वायंभुवोमुनिः २३ तेपितन्मुखनिर्यातंयशोलोकमलापहं हरेर्निशम्यतत्पादंध्यायंतस्तद्ग
तिंययुः २४ एवंतेभिहितंक्षत्तर्यन्मांत्वंपरिपृष्टवान् प्रचेतसांनारदस्यसंवादंहरिकीर्त्तनं २५ श्रीशुक
उवाच यएषउत्तानपदोमानवस्यानुवर्णितः वंशःप्रियव्रतस्यापिनिबोधनृपसत्तम २६ यो ४
नारदादात्मविद्यामधिगम्यपुनर्महीं भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं २७ स्कं

सःकर्मभूतान्अन्याश्चननंदनीतेत्यादिध्रुवचरिताद्याः सूत्रेगायत्प्रचेतसामित्युक्तत्वात् २३ २४ प्रचेतसां १२६
नारदस्यचसंवादरूपमेतदाख्यानंतेभिहितं हरेःकीर्त्तनंयस्मिंस्तत् २५ यएषवंशःसोनुवर्णितः २६ यःप्रिय

२८ २९ स्वानज्ञातीनदिदृक्षुः ३० राज्ञांचरितमितिशेषः ३१ इतिश्रीभावार्थदीपिकायांचतुर्थस्कंधे

इमंतुकौषारविणोपवर्णितंक्षत्तानिशम्याजितवादसत्कथां प्रवृद्धभावोश्रु
कलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः २८ विदुरउवाच सोयंतेनमहा
योगिन्भवताकरुणात्मना दर्शितस्तमसःपारोयत्राकिंचनगोहरिः २९ इत्यान
म्यतमामंत्र्यविदुरोगजसाह्वयं स्वानांदिदृक्षुःप्रययौज्ञातीनांनिर्वृताशयः ३०
एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मनां आयुर्धनंयशःस्वस्तिगतिमैश्वर्यमा
प्नुयात् ३१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेएकत्रिंशोध्यायः ३१

एकत्रिंशोध्यायः ३१ समाप्तश्चायंचतुस्कंधः ॥ शुभंमस्तुसर्वजगताम्

4E

370-M

Canto 4